[Th]e Dakshina-Bharati Sanskrit Series, No. 4.

KAUMUDIMAHOTSAVA

A HISTORICAL DRAMA

EDITED BY

M. RAMAKRISHNA KAVI, M.A.

AND

MIMANSACHARYA

S. K. RAMANATHA SASTRI

MADRAS

1929

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

[All] Rights Reserved] [Price As. 10

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दक्षिणभारतीग्रन्थमाला. सं—4.

श्री

कौमुदीमहोत्सवः ।

मा. रामकृष्णकविना,

एस्. के. रामनाथशास्त्रिणा च

परिशोधितः.

मद्रास्

1929.

मूल्यम् ०—१०—०.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

891.22
K

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

INTRODUCTION

Ms. Material :—The manuscript of this drama was obtained on loan in British Malabar by the members of the peripatetic party instituted by Madras Government. A copy was taken from it at the G. O. Mss. Library and the manuscript was returned to the owner. The present edition is based upon another direct copy from the same original. All efforts to obtain a second copy proved fruitless. The original copy is on the palm-leaf of *sritála* kind and the copying may not be older than 150 years. The same volume contains another drama called *Abhirámachitralekha* probably a work of the 13th century. The superscript on the covering leaf mentions only the latter work.

The name of the drama :—There is no mention of the name of the drama in the prologue and no colophon at the end to indicate the work or its author. The scribe at the close of the copy wrote Kaumudimahotsava without any apparent connection with the rest of the work. It was inferred that the drama might have been known by that name. The words of the *Sútradhára* in the prologue *Punarpyayam aparah pratyásidati Kaumudimahotsavah* may support this conjecture. Of course Kaumudimohotsava was a common annual autumnal festival celebrated at Pàtaliputra and there are references to it in Mudràràkshasa. Here the two words *Punah* and *aparah* are significant of a different type of enjoyment. The editors gave that name to this drama when they brought the Ms. to the G. O. Mss. Library and the same is adopted here.*

The author :—It is here that conjecture has its full play. In the prologue the letters that mention the name of the poet are worm-eaten in the original manuscript and the space occupied by them can contain two letters only. The letters following are *Kayá nibaddham* which suggest that the author belongs to the fair sex and her name is consecrated in three letters. It was guessed as *Vijjiká*. A close examination of the leaf revealed a part of *ja* underneath the worm-eaten portion which further strengthens that *ja* may be the latter half of

---

* A number of dramas obtained in Malabar do not bear any names. Even 13 dramas ascribed to Bhasa are found there with abbreviated names. All the dramas of Udayana's heroship are called *Vatsarájacharita* including Ratnàvali, Priyadarsikà etc. Vìnàvàsavadatta was a name given by us on the support of a passage in *Sàkuntaláchharchana* where *Vìnávàsavadatta* is said to begin with a benedictory verse containing 22 words. The name is now confirmed by the collation of a complete copy of it. Even Bhasa's dramas are found with different names. *Karnabhàra* is known as *Kavachádàna* and *Kundalàharana*. Urubhanga as *Gadáyuddha*. Abhisheka as *Rámábhisheka*. and *Pratima* as *Pratimàráma* and *Pratimà dasaratha* etc. The critical work on Sàkuntala named above mentions a few more plays not yet published viz., *Chandála-rámáyana, Unmàdavàsavadatta* and *Traivikrama*. The last alone of the three has been obtained and published in this series.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

conjunct consonantal sound. In accepting this we shall have to meet with difficulties. In the fourth act (page 35 verse 19) Vijayá is mentioned, in a significant manner. Vijja seems to be the Prakrit form of Vidyá and does not bear any philological relation with Vijayá. In the same verse 'Anantanáráyana', the chief deity of Trivandrum, may indicate that either the poet's name was it or any princess Vijaya was the devotee to the god Anantanáráyana of Trivandrum. Then the drama must be a Malabar production. The last verse *Bharata-vákya* contains another significant word Nîlakantha whose name is familier to us as the author of Kalyána-saugandhika which in some respects bears cloee resemblance to the Bhárata dramas of Bhása. Nilakantha may be assigned to 850 A. D. But Kaumudîmahotsava differs in style and thought from the works of either Anantanáráyana (author of Chandrîkájanamejaya) or Nilakantha, who lived at Paramakudi in Tinnevelly District. This work is not found quoted anywhere with or without name as far as we could ascertain. The diction appears to be a maiden attempt of a great poet and the prose simple and fluent has dignity in expression.

The plot of the drama as revealed in the Fourth Act is a commonplace political act eclipsed by the amours of the hero and heroine. Chandasena, the military commandant of Sundaravarman, a king cf Magadha, conspired with the Licchavis, the hereditary enemies of his lord and brought abou' their attack on Pátaliputra. In the contest between Sundaravarman and the Licchavis, the former died on the battle field. Chandasena became the king. Mantragupta, the minister of Sundaravarman, secreted the prince Kalyanavarman with a few ministers' sons to a place called Pampá in the Vindhyas, while he himself in various disguises watched an opportunity to regain the throne for the prince. Some years passed before he could muster forces and defeat the traitor. At last Kalyánavarman was installed on the Magadha throne. The drama was staged on the occasion of his coronation.

An amorous incident covers up the political stratagem of Mantragupta. Kîrtimatî, the daughter of Kîrtisena, the king of he Súrasenas, accompanied one Yogasiddhi, a nun, who was proceeding to worship Vindhyavásinî in he Vindhyas. The nun was once the nurse to Kalyánavarman at Pátaliputra and since the death of his father, Sundaravarman, she renounced all worldly ties and spent her days in various holy places. When she came to Mathura the royal household treated her most kindly and even entrusted their daughter, Kîrtimatî, to her care in her pilgrimage to Vindhyavásinî. During their stay at Pampá the prince and princess met each other by accident and their first sight slowly developed into love. Yogasiddhi saw their portraits as drawn by the goddess and identified between the couple the child growing into prime youth once nursed by her. She fell into a reverie of old reminiscences. Meanwhile Mantragupta killed the usurper and proclaimed Kalyánavarman as king of Magadha. The nun and the princess went back to Souráshtra, and her fathes Kîrtishena was doubly pleased to receive the intelligence of Kalyánavarman'r prosperity and his daughter's overtures of love and sent an ambassador with a

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

pearl-necklace which had a heroic history behind it and with the proposals of marriage of his daughter to the Royal youth. Kalyànavarman was only too glad to reject such an offer of friendly allegiance and prop of life.

The plot appears to possess some historic background. The conquest of Magadha by the Lichchavis was not unfrequently a historic incident. But our knowledge of the Lichchavis or the history of Magadha is not sufficiently advanced to identify any of the dramatic characters with historic persons. The history of Magadha from second century to the sixth century after Christ is not perfect and usurpation of Magadha was a common incident at least once in each century. The mystery of the plot, though quite commonplace, enhances the mystery of the authorship or the period of its composition. Though we can emphatically say that the work is not a fanciful conception of a Malayali yet we cannot but feel our inability to point at the particular time and place of the hero or his poet.

The plot, laid with perfect simplicity, and the expression, simple and quite natural, assign the play to the period of Sanskrit literature between 500 and 700 A.D. The author seems to have studied Kálidása and Bhàravi. *Saileyagandhini Silátaleshu, Vishayeshu paryanta-paritapanáh* are respectively the plumes borrowed from them.

Dhvastah Sundarapàtalo'api patitah Kartyàyanah Saktitah refers to Sálankàyana's capture of Udayana. Sundarapátala was Udayana's horse and Kártyáyana was his military attendant who accompanied him to Nàgavana. His fall was referred to in Vinavàsavadatta:—

Saunakam iva Bandhumati Kumàram Avimàrakam Kurangi'iva.

Saunaka, a brahmin hero, falls in love with Bandhumati, the daughter of a king of Ayodhya and induces her to leave her parental home. On the way they miss each other and reunite. Her father is attacked by the Lord of Trigarta to whom she is betrothed. Saunaka gathers an army and relieves his father-in-law from danger. In his next birth he becomes Súdraka. The story is given in Avantisnndari of Dandin.

Avimàraka is the hero of a drama of the same name ascribed to Bhasa. He marries Kurangi. Vátsyáyana refers to his story. A critic may be induced to say that the author of our drama might have written Avimáraka and Bandhumati-Saunaka besides Vinàvásanadatta. At the present stage it must be said that style alone is sufficient to ascribe our work to a different hand from either Bhasa or Súdraka, the author of Vinàvàsavadattà.

There are references in this work to Dattaka, Gonikáputra and Múladeva whom old poets frequently mention. The use of technical terms as *átyayika-dúta* etc., also supports the antiquity of the drama. Sugànga and Suyàmuna were the royal palaces at Pátaliputra and Kausambi and Mudràràkshasa and Brihatkathá-Sloka-Sangraha use these terms. Avantimàsha appears to be a gold coin current in Màlwa but the character who uses the term was of Pàtaliputra. This use may speak in favour of the poet's nativity in Málwa.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

The work was taken up in the Dakshinabhārati Sanskrit Series. The editor and the Secretary of the Andhra Historical Research Society requested us to issue it in their series for enlightening research in pure history. We have to issue it again in our series on account of its literary value.

MADRAS
1st June 1929.

M. RAMAKRISHNA KAVI.

Addendum.

Page 13 lines 6 and 21.

For Hiorattie hyastana ratrau must be read in the Sanskrit rendering.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ श्रीः ॥

कौमुदीमहोत्सवः ।

प्रथमोऽङ्कः ।

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्र— श्रीमद्वैयाघ्रचर्मास्तररचिततले स्थण्डिले संनिषण्णः
कृत्वा पर्यङ्कबन्धं फणमणिकिरणक्षारिणा तक्षकेण ।
नानात्वग्रन्थिभेत्रीं धियमिव विकिरन् दन्तकान्तिच्छलेन
ब्रह्मव्याख्याननिष्ठस्तव भवतु तमःकृत्तये कृत्तिवासाः ॥ १ ॥

(परिक्रम्य) अये! अयं समुपस्थितः सर्वजनसामान्यमहोत्सवभूतः शरत्समयसमवतारः । तथा हि—

हंसः सैकतमुत्सुकेन मनसा प्रत्यागतः प्रेक्षते
भृङ्गो मङ्गलपाठकः सरसिजं प्राप्तोदयं सेवते ।
रिक्तोऽपि ध्वनिपूरितत्रिभुवनं कृत्वा वदान्यप्रथां
पश्चादेति शनैः शनैः परिणतो मेघः परामुन्नतिम् ॥ २ ॥

अपि च,

कृष्णशारां कटाक्षेण कृषीवलकिशोरिका ।
करोत्येषा कराग्रेण कर्णे कलममञ्जरीम् ॥ ३ ॥

तदानीं तत्रभवतः पाटलिपुत्राधिपतेः सुगृहीतनाम्नो देवस्य कल्याणवर्मणः प्रतिनवराज्यलाभसंवर्द्धितदृष्टिवृद्धिपरसंकुलेऽपि राजकुले पुनरयमपरः प्रत्यासीदति कौमुदीमहोत्सवारम्भः, तदहमपि स्वकुलोचितेन सङ्गीतकसेवाधिकारेण लब्धावसरो राजकुलं प्रविशामि । (प्रविश्य) प्रयुक्तपूर्वेषु पूर्वसूरिसूक्तिविशेषेषु का पुनरभिनवरमणीया कृतिरभिनेतव्या । भवतु, यत्तदस्यैव राज्ञः समतीतं चरितमधिकृत्य (विज्जि)कया निबद्धं नाटकम् । तदिदानीमग्रतः कृत्वा मगधराजान्तःपुरमवतरामि । तत्र मे सन्तः सहायाः—

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विरसापि कृतिः प्रपत्स्यते
मधुनिष्यन्दमयं दशान्तरम् ।
यदि नाम सतामनुग्रहः
शिशिरः प्राप्य रवेरिवातपम् ॥ ४ ॥

(विलोक्य ससम्भ्रमम्)

तपसेव विभक्तविग्रहं
किमिदं धाम गृहीतवल्कलम् ।
पुनरुक्तमिवोपलक्ष्यते
वटुवेषग्रहणं विभावसोः ॥ ५ ॥

हन्त! विज्ञातम्, अस्मत्पक्षपातात् स्वयमेव पारिपार्श्वको मुनिशिष्यभूमिकामादाय इत एवाभिवर्तते। तदहमप्यनन्तरोचितेषु करणीयेषु व्याप्रिये। (निष्क्रान्तः)

स्थापना।

(ततः प्रविशति मुनिशिष्यः)

मु—अहो नु खलु कुलपतेराश्रमपदस्य महती सम्भावना। यतस्तदा विद्याविनीते गुरुजनानुज्ञाते समं सवयोभिः स्वकुलोचिते कर्मण्यधिकर्तुं प्रस्थिते कुमारे—

पुष्पं बाष्पजलोपमं क्षितितले मुक्तं मुहुः पादपै-
र्यावद्दृष्टिपथं तपोवनमृगैरुद्ग्रीवमुद्वीक्षितम् ।
चिन्ताशून्यधियो निमीलितदृशः सास्राः क्षणं तापसाः
शङ्के शोककलङ्किताः कुलपतेः कण्ठे गिरः कुण्ठिताः ॥ ६ ॥

अथ वा सर्वमिदं कुमारमुद्दिश्येति नात्र विस्मयनीयं पश्यामि। कुतः—

श्रीवृक्षाङ्कमुरःस्थलं हरवृषप्रस्थानखेलं गतं
पादावङ्कुशकेतुलाञ्छिततलावाजानुलम्बौ भुजौ ।
प्राप्तं चारु मुखं ललामरचनामुन्मेषिणीमूर्णया
पर्याप्तं गुणसम्पदां नृपसुतः सङ्केतगोष्ठीगृहम् ॥ ७ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

HER HIGHNESS SETU PARVATI BAYI D. Litt.,
MAHARANI OF TRAVANCORE.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

DEDICATED

BY

GRACIOUS PERMISSION

TO

HER HIGHNESS

MAHARANI SETU PARVATI BAYI

OF

TRAVANCORE

D. Litt.

PRO-CHANCELLOR

OF

THE UNIVERSITY OF TRAVANCORE

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

In Rasārṇavasudhākara a good genealogy is given which tallies well with the genealogy elaborated by Dr. Veṅkataramaṇayya except in one small particular, *viz.*, that Siṅga II is the younger son of Anapota, the elder being one Devagirīśvara who perhaps died early, as may be inferred from the words of Rasārṇavasudhākara :—

तयोरभूतां पुत्रौ द्वावाद्यो देवगिरीश्वरः ।
द्वितीयस्त्वद्वितीयोऽसौ यशसा शिङ्गभूपतिः ॥ (I. 26)
अथ श्रीशिङ्गभूपालो दीर्घायुर्वसुधामिमाम् । (I. 27)

Being the direct words of the author and in respect of himself, this may be accepted as the true genealogy. The historical fact that Yerra Dāca Nāiḍu (4) engaged himself in Pāṇḍyan wars successfully and the special mention against Dācanāyaka in Rasārṇavasudhākara as "पाण्ड्यराजगजानीकाज्जयलक्ष्मीरुपागता" make it certain that our author begins his genealogy from the 4th generation. The author in Rasārṇavasudhākara mentions that Recallavaṃśa comes of the fourth Varṇa:

"अस्ति किञ्चित् परं वस्तु परमानन्दकन्दलम् ।
कमलाकुचकाठिन्यकुतूहलि भुजान्तरम् ॥
तस्य पादाम्बुजाज्जातो वर्णो विगतकल्मषः।" (Rasār. I. 3 and 4)

He ruled over a vast extent of territory between the Vindhya mountains and Śrīśaila in the Kurnool District. The Rajas of Veṅkaṭagiri trace their descent from Vetaḷa Nāiḍu, the founder of that dynasty.

The work.

The present work appears to be an earlier production than Rasārṇavasudhākara since two at least of the ślokas (Act. ii.-15 and Act. iii. 4) are found quoted in that work. That the author had a high opinion of this drama is evident from the words "अखण्डपरमानन्दवस्तुचमत्कारिणीं कुवलयावलीं नाम नाटिकां........" of Sūtradhāra as well as from the colophon :

"पूर्णेयं शिङ्गभूपेन कथिता मधुजल्पितैः ।
रत्नपाञ्चालिका नाम नाटिका रसमेदिका ॥"

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

This edition is prepared from two manuscripts, Nos. 2033 and 2399, belonging to the old Curator's library. Both are in Grantha script; 2399 is complete while the beginning and end leaves are badly damaged in 2033. Both the manuscripts hail from South Travancore, 2033 from Anantakṛṣṇa-Śāstrī, son of Bhagavatisubrahmaṇya Śāstrī of Āśrāmam near Sucīndram and the other from Sthāṇusubrahmaṇya Śāstrī of Cape Comorin. Both are almost alike and differences in readings are few and inconsequential.

Story and plot.

Though some of the *dramatis personae,* such as Kṛṣṇa, Nārada and Rukmiṇī are puranic and the story as a whole is given a puranic touch, it has no such basis and is imaginary. The drama is given two distinct names, Kuvalayāvalī and Ratnapāñcālikā, by the author himself as is evidenced from Sūtradhāra's words and the colophon already cited. The story is this. At the instance of Brahma, Bhūmi assumes the form of a maiden whom Nārada in the guise of a foster-father leaves under the protection of Rukmiṇī as a Nyāsa, pretending that he is going about in search of a suitable groom for the girl. Nārada has given his foster-daughter a charm in the form of a ring which, when she wears, would make her appear to males as a statuette in precious stones instead of as a normal human maiden. This charm is meant to protect her from possible unwanted attentions of males. The name Ratnapāñcālikā arises out of this peculiarity of appearing as a doll (Ratnapāñcālikā a statuette or doll in precious stones). While under Rukmiṇī's care, Kuvalayāvalī, in the company of her friend Candralēkhā, one day happens to go to the palace gardens where she chances to meet Kṛṣṇa who was enjoying a pleasant evening after his return from a campaign against Kālayavana. Kṛṣṇa first takes the girl for a wonderful statuette and fails to understand why Candralēkhā keeps talking to a doll as if mad. Then he begins to suspect. In the course of her playful acts and unknown to her, the charm

CC-0. Prof Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ring chances to fall off from Kuvalayāvalī's fingers which exposes her true nature to Kṛṣṇa and a mutual love ensues. By this time, on a summons, Candralēkhā and Kuvalayāvalī go away leaving Kṛṣṇa alone in the gardens. While Kṛṣṇa is idling there thinking of the charming girl who had just then left the place, he finds the lost ring of Kuvalayāvalī; and the legend engraved on it enlightens him of the properties and purpose of that ring. By this time Kuvalayāvalī becomes aware of the loss of her ring and hastens back to the garden in search of it. Kṛṣṇa now restores the ring to her. These two chance-encounters pave the way for more secret love-meetings. Satyabhāma chances to come upon one such love-meeting and on her information Rukmiṇī causes Kuvalayāvalī to be kept in concealment in one of her own Prāsādas. A Dānava getting scent of this, forcibly abducts Kuvalayāvalī which urges Rukmiṇī to seek the help of Kṛṣṇa to get her back. Kṛṣṇa undertakes the mission and goes to fight the Dānava. During the absence of Kṛṣṇa, Nārada returns and in his conversation informs Rukmiṇī about the real story of Kuvalayāvalī. When Kṛṣṇa returns after defeating the Dānava, Rukmiṇī with the consent of Nārada and others gives away Kuvalayāvalī as a present to Kṛṣṇa for his acceptance as wife.

Diction and plot.

The leading Rasa is Śṛṅgāra, the Vipralambha type dominating. Most of the Rasas are represented and Śrīvatsa makes a good court-fool. The make-up of the plot, the nyāsa of a maiden and its subsequent developments strongly remind one of Svapnavāsavadatta. In literary merit, and particularly in the meticulous adherence to the rules of poetics and Alaṅkāra, the work is of a very high order. In many places one meets with passages having striking resemblances to passages in the Sākuntala of Kālidāsa. Kṛṣṇa's apostrophe to the ring of Kuvalayāvalī,

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

"तिरयसि यन्मधुरगिरो लावण्यं मदनराज्यमुद्रायाः।
दुरितेन तेन मुद्रे स्वपदपरिभ्रंशमुपगता भवती॥" (Act ii. śl. 1)

bears close kinship to Duṣyanta's in Śākuntala "कथं नु तं बन्धुरकोमलाङ्गुलिं ...." and some resemblance to "श्रुतिसुखनिनदे कथं नु देव्याः ...." in Svapnavāsavadatta (vi. śl. 1.) There is much resemblance both in the situation created, and in sentiments, in the Śṛṅgārasallāpa of Śakuntalā (Act iii) and of Kuvalayāvalī (Act iii). The portions in Śākuntala

"(शकुन्तलाभ्युत्थातुमिच्छति)
सन्दष्टकुसुमशयनान्याशु क्लान्तविसभङ्गसुरभीणि।
गुरुपरितापानि न ते गात्राण्युपचारमर्हन्ति॥

....

अलमलमावेगेन नन्वयमाराधयिता जनस्तव समीपे वर्तते। ....

(बलादेनां निवर्तयति)

शकुन्तला— पौरव, रक्ख अविणअं।" (Bombay Edition)

....

....

"कुवलयावली— (सश्रृङ्गारसाध्वसमुत्थातुं प्रयतते)

नायकः— (बलादेनां निवारयन्)

नहि वयमिदानीमुपचरणीयाः; किन्त्वस्माभिरेव,

अभिनवबिसकाण्डपेलवं तदनु पयोधरभारभङ्गुरम्।
तदुपरि परितापनिस्सहं परिचरणीयमिदं तवाङ्गकम्।

कुवलयावली— भो मुग्ध अविणअं रक्खेहि। ....'

and of Kuvalayāvalī exhibit a close cousinship. In Act ii, the Nāyaka's description to his court-fool of Kuvalayāvalī's mental attitude towards him "अभिलाषो वामाक्ष्याः प्रदीप इव यवनिकाप्रकाशाभ्याम्। मन्दाक्षमन्मथाभ्यां न च प्रतीतो नचाप्रतीतश्च" closely resembles its counterpart in Śākuntala 'विनयवारितवृत्तिरतस्तया न विवृतो मदनो न च संवृतः" A number of such resemblances are encountered.

Evidence of scholarship.

That the author himself appreciated the high degree of scholarship exhibited in this drama is evident from the Dhvani contained in his own words:

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अपूर्वसंविधानेन तरङ्गितचमत्कृते: ।
पारितोषिकदानेऽहमधमर्णो भवामि ते ॥

(Act i. 11.) and

"रम्या वागिव सुप्रसादमधुरा देवीमणी रुक्मिणी
सन्तानार्थ इवात्युदारगरिमा स त्वं परिद्योतसे ।
कन्येयं करवल्लरीव विलसत्यन्योन्यमैत्रीक्रमो
युष्माकं भुवि मादृशान् सहृदयानानन्दयन्नेधताम् ॥"

(Act. iv. 22)

contained in this drama itself. Besides this it is found that a stanza from this drama:

"उत्फुल्लगण्डयुगमुद्गतमन्दहास-
मुद्वेलरागमुररीकृतकामतन्त्रम् ।
हस्तेन हस्तमवलम्ब्य कदा नु सेवे
सल्लापरूपममृतं सरसीरुहाक्ष्याः ॥"

(Act. iii. 4).

is quoted by the author himself in his work on dramaturgy and Rasa to exemplify not less than 9 factors :— 1. Mahāprāṇavarṇālpatvam, 2. Śleṣa, 3. Prasāda, 4. Miśrabandhasamatā, 5. Mādhurya, 6. Sukumaratā, 7. Arthavyakti, 8. Udāratvam and 9. Ojas. This clearly shows the amount of scholarship exhibited in this work. A high degree of scholarship in the field of grammar is also evident from this drama:

"उत्फुल्लगण्डमण्डलमुल्लसितदृगन्तसूचिताकूतम् ।
नमयन्त्यापि मुखाम्बुजमुन्नमितानङ्गसाम्राज्यम् ॥"

(Act ii. 15).

In this the first verb उन्नमिता (ण्यन्तात् कर्मणि लुट्) appears to be a luṭ in place of what ought to be a lṛṭ. This bold use is perhaps the result of a corollary deducible from the Bhāṣya "लुङ्लटोर्लङ्लुटावपवादौ भवतः". So also the form "गमितुम्" (ण्यन्तात् तुमुन्) in

"गन्तुं पदादपि पदं गमितुं न चालम्"

(Act iii. 1).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

Such usages are very uncommon if not unknown, and can be justified only with great difficulty. None but those for whom grammar is a servant and not master, will have the boldness to use such forms.

On the whole, this drama appears to be one which can be included among the high class dramatic compositions in Sanskrit; fine in conception, chaste in language and diction and very rich in Rasa characteristics. And above all it appears to possess that composite quality which will enable the composition to be staged provided cultured actors, who can realise and bring out the Rasas in full, are available.

Notwithstanding every care bestowed, a few typographical errors have crept in necessitating a small erratum slip and we crave the indulgence of readers in this matter.

Oriental Manuscripts Library,
University of Travancore,
Trivandrum,
21st April 1941.

L. A. RAVI VARMA,

Honorary Director.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्लोकानुक्रमणी ।

श्लोकः.		पृष्ठम्.
अण्णस्सिं वसइ	...	२०
अतिमधुरकण्ठनालैः	...	९
अद्य श्वो भविता	...	५७
अन्तर्हितो	...	४१
अपूर्वसंविधानेन	...	१२
असिनववसि	...	४६
अभिलाषो	...	२२
अम्भोजिनीमिव	...	६०
अयि त्वमेवं	...	६६
अयि दिग्धिए	...	
अहो साहित्यसौभाग्यं	...	२
आकर्णितानि	...	४३
आकल्पैरतिसान्द्र	...	४२
आगो नास्तीति	...	५०
आचर्वणेन	...	६७
आद्वापरोदयम्	...	६२
आस्ते पीठे	...	५६
इतो भृङ्गीगतिम्	...	३९
इयमनिल	...	४१
उत्फुल्लगण्डमण्डलम्	...	३३
उत्फुल्लगण्डयुगम्	...	३७
ऊरुभ्यां करभोरु	...	२८
कण्टककलिका	...	५३
कन्या करेण	...	१७
करभोरु	...	४६
कलकण्ठो	...	४३

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्लोकः		पृष्ठम्
कल्याणमस्तु	...	७१
कुसुमायुधलक्ष्मीर्वा	...	१३
कृतोपकारेषु	...	६५
क्वासौ दृशोरमृत	...	४०
क्षणविनयरोषपरिगतिः	...	१५
गाढं मानमुपास्य	...	७१
चक्रं विलोक्य	...	६१
चोरस्यापि धनम्	...	२८
जयंतितरां रति	...	३७
जानासि लक्ष्मि	...	६४
ताम्रोदरेण	...	६७
तिरयसि यन्मधुरगिरो	...	१८
दत्तासि धर्मे	...	४७
दृष्टिप्रतिबन्धकृता	...	१२
नास्वादितम्	...	५२
नितम्बो विम्बेन	...	१९
निर्विश्लेषरथाङ्ग	...	६६
निवार्यते	...	६७
नूनमस्याः प्रभावेन	...	१७
नेता मन्मथकारणम्	...	२
पद्भ्यां पद्मरुचिम्	...	२८
पद्मं पङ्कनिकेतनम्	...	२०
परस्परानुरागाय	...	६५
परिश्रमवलेण	...	४८
प्रत्यालोकनलालसैरपि	...	२२
बद्धे भ्रूयुगले	...	५२
बीजावापमुपेयिवान्	...	१
भद्दस्सअस्सं	...	२२

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्लोकः.		पृष्ठम्.
मयि भ्रातरि	...	६०
मिलितानां सुजातानां	...	८
रुद्दवइणा	...	४३
रक्ताब्जसैकतावर्त्त	...	४०
रत्नपाञ्चालिकैवेयं	...	९
रम्या वागिव	...	७१
राजत्कोरक	...	३८
रुक्मिणीसत्यभामादि	...	३
रुन्धानया	...	३४
लक्ष्येषु पाणि	...	,,
ललितकविता	...	२३
वरतनुमनिरीक्ष्य	...	१९
विटपवती	...	४९
विलोलभ्रूवीचेः	...	२१
व्रतानि वर्णनीयानि	...	२,७०
शृङ्गारवीरसौहार्दे	....	१
सकृदपि पुनरक्ष्णोः	...	२३
सञ्चारिणी	...	१३
सलीले धम्मिल्ले	...	५८
सापराधे च	...	५१
सिद्धार्थखण्डन	....	६१
सुराः सप्ताब्धि	...	१२
सेयमालक्षितरूपा	...	११
स्वस्ति श्रीवासुदेवाय	...	६८
हन्त! स्वयमेव	...	७०

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शुद्धिपत्रिका ।

पृष्ठम्.	पङ्क्तिः.	अशुद्धम्.	शुद्धम्.
१५	१५	भर्त्री विसर्जिता	भर्त्राविसार्जिता
,,	१७	स्तब्धचरणावितोमुखं	मम चरणावित्तोमुखं
२३	२०	वेत्यकुलास्मि	वेत्याकुलास्मि
७०	५	कुवलयदृशा	कुवलय(सु)दृशा

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

॥ श्रीः ॥

श्रीशिङ्गभूपालविरचिता

कुवलयावली ।

---

[1]शृङ्गारवीरसौहार्दं मौग्ध्यवैयात्यसौहृदम् ।
लास्यताण्डवसौजन्यं दाम्पत्यं तद् भजामहे ॥ १ ॥

अपिच,

बीजावापमुपेयिवान् स्मृतिवशाद् रागोष्मणोद्भेदवा-
न्न्योन्यस्य कराङ्गुलीघटनया प्राप्तप्रवालोद्गमः ।
विस्रम्भेण विकासवान् सफलतामैक्येन सम्भावयन्
कल्याणं भवतां करोतु शिवयोरानन्दकल्पद्रुमः ॥ २ ॥

[नान्द्यन्ते]

सूत्रधारः — अद्याहं सकलसौभाग्यभासुरभवनाममरावतीविभवविलासरेखामणिमुकुरायमाणां धरणीदेवतानवरतसन्तन्यमानसप्ततन्तुसन्तानधूमरेखाच्छलविलिख्यमानगगनलक्ष्मीगण्डमण्डलाभोगमृगमदपत्रभङ्गाम् अभङ्गविहरमाणवीरभटकनककेयूरकोटीसङ्घट्टसञ्जातजातरूपरजःपुञ्जपिञ्जरितराजरथ्यागणाम् अनङ्गपुनरुज्जीवनप्रसङ्गमङ्गलायतनारम्भविरचितनवकुवलयतोरणश्रीविडम्बितरलतरापाङ्गवारविलासिनीजनविराजमानां राजशैलाभिधानां राजधानीम्

---

१. 'शृङ्गारवीरसौहार्दंमौग्ध्यवैयात्यसौहृदम् ।' ख. पाठः.

G. P. T. 530. 500. 17-4-1116.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अधिवसतः प्रसन्नगोमलदेवस्य वसन्तयात्रामहोत्सवे समुत्सुकचेतसा सकलदिगन्तसमागतेन नागरिकराजसभाजनेन सभाजनपुरस्सरमिदमादिष्टोऽस्मि—'अये रङ्गलक्ष्मीनिवास! ललितकविताविलासचतुराननेन चतुरुदधिवलयवेल्लितवसुन्धरापरिणाहपरिगलत्कीर्तिकर्पूरपूरापहासितान्यराजन्यगुणगौरवेण प्रतिगण्डभैरवेण भरितलक्ष्मीसरस्वतीपरस्परविरोधपरिवादपरिहरणप्रवीणनिजगुणतरङ्गितान्तरङ्गविद्वज्जनसभाजनपरायणेन खड्गनारायणेन मान्यमहिलागुणविशेषलीलासदनोमाम्बिकाविडूरविश्वम्भराविमलरत्नकन्दलेन श्रीमता श्रीशिङ्गभूपालेन प्रणीतामखण्डपरमानन्दवस्तुचमत्कारिणीं कुवलयावलीं नाम नाटिकां प्रयोगतो दर्शये'ति ।

[सानुसन्धानगौरवम्]

अहो साहित्यसौभाग्यं श्रीशिङ्गधरणीपतेः ।
श्लाघायै यस्य सन्नद्धा विश्वेश्वरसरस्वती ॥ ३ ॥

[सहर्षम्]

नेता मन्मथकारणं यदुपतिः *श्रीयन्नमातात्मजो
नाट्यालङ्कृतिनिर्मितौ परिणतः श्रीशिङ्गभूपः कविः ।
एषा पण्डितमण्डली रसकलासाम्राज्यसञ्जीवनी
पुण्येनाद्य पुराकृतेन फलितो मे नाट्यविद्याश्रमः ॥ ४ ॥

[नेपथ्याभिमुखमवलोक्य]

आर्ये! किमिदानीमपि विलम्बसे ।

---

* देश्यमिदं प्रतिभाति.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

[प्रविश्य]

नटी — [सविनयम्] (क) अय्यउत्त ! सज्जीकिआ णेपच्छसामग्गी । ता दाणिं [1]अत्त उत्तरकरणिज्जं आणवेहि ।

सूत्रधारः —

रुक्मिणीसत्यभामादिसमेतपुरुषोत्तमाम् ।
उत्कण्ठते सभा द्रष्टुं सेयं कुवलयावलीम् ॥ ५ ॥

तदनुसन्धीयतां भूमिकापरिग्रहः ।

नटी — (ख) अय्यउत्त ! तुह चित्ताणुसरणं विणा मह किं अण्णं अत्थि ।

सूत्रधारः — साधु कल्याणशीले ! साधु

व्रतानि वर्णनीयानि सन्त्वन्यानि सहस्रशः ।
परं व्रतं पुरन्ध्रीणां पतिचित्तानुरञ्जनम् ॥ ६ ॥

[नेपथ्ये]

(ग) हळा ! सुदं एदं इत्थिआपुरुसत्थसारं वअणम् ।

क. आर्यपुत्र ! सज्जीकृता नेपथ्यसामग्री । तदिदानीमत्रोत्तरकरणीयमाज्ञापय ।

ख. आर्यपुत्र ! तव चित्तानुसरणं विना मम किमन्यदस्ति ।

ग. हला ! श्रुतमिदं स्त्रीपुरुषार्थसारं वचनम् ।

---

१. 'अय्यउत्त करणिज्जं' क. पाठः.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सूत्रधारः— [सहर्षम्] अये अयं कालयवनविजयाय प्रयाते वासुदेवे तदभ्युदयकाङ्क्षी विलासोद्याने सौभाग्यलक्ष्मीचिरण्टिकाप्रसाधनाय मिश्रितो रुक्मिणीप्रमुखदेवीपरिजनो महानित एवाभिवर्तते । तदेहि दूरमपसरावः ।

[इति निष्क्रान्तौ]

आमुखम् ।

[ततः प्रविशति देवीजनो विभवतश्च परिजनः]

रुक्मिणी—(क) हळा ! तुझेहिं सुदं इत्थिआपुरुसत्थसारं वअणम् ।

इतराः—(ख) महादेवि ! सुदं विदिअं पुणो पुणो सोदव्वं ।

रुक्मिणी—[सस्मरणहर्षम्] (ग) हळा ! एदं (वि?) णारअमहेसिणा वि ळ(च्छ ? च्छीए) उवदिट्ठं ।

जाम्बवती—(घ) महाभाए ! तारिसं दारिअं (अं)तेउरण्णासं कदुअ वरं आहवप्पिओ अण्णेसिदुं गदो सो महेसी दाणिं णं पच्छागओ ।

क. हळा ! युष्माभिः श्रुतं स्त्रीपुरुषार्थसारं वचनम् ।

ख. महादेवि ! श्रुतं विदितं पुनः पुनः श्रोतव्यम् ।

ग. एतन्नारदमहर्षिणापि लक्ष्म्या उपदिष्टम् ।

घ. महाभागे ! तादृशीं दारिकामन्तःपुरन्यासं कृत्वा वरम् आहवप्रियोऽन्वेषितुं गतः स महर्षिरिदानीं ननु प्रत्यागतः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

रुक्मिणी — (क) अहइं ।

कालिन्दी—(ख) देवि! किं सा एसा दारिआ । जा इत्थिआदिट्ठीए इत्थिआ पडिहादि पुरुसदिट्ठीए वि रअण-पंचालिए त्ति सुणीअदि ।

रुक्मिणी—(ग) आम भइणीए! आम ।

सत्यभामा —[आत्मगतम्] (घ) अहो उप्पिंजळिअसह्मावा रुक्मिणी किं वि ण आणादि । अय्यउत्तस्स चित्तरञ्जणेक्कसीळो कपडणाडअणिव्वहणत्थुदिवादो खु सो सुरेसी । तेण कम्पइ विअ मे अप्पा ।

मित्रविन्दा—(ङ) देवि! अय्यउत्तस्स वुत्तंतो ण को वि उवलद्धो तस्स मुहादो । सो किळ कळहप्पिओ तिभुवणं परिब्भमइ ।

क. अथकिम् ।

ख. देवि! किं सैषा दारिका, या स्त्रीदृष्ट्या स्त्री प्रतिभाति पुरुषदृष्ट्यापि रत्नपाञ्चालिकेति श्रूयते ।

ग. आम भगिनिके! आम ।

घ. अहो उत्पिञ्जलितस्वभावा रुक्मिणी किमपि न जानाति । आर्यपुत्रस्य चित्तरञ्जनैकशीलः कपटनाटकनिर्वहणस्तुतिवादः खलु स सुरर्षिः । तेन कम्पत इव मे आत्मा ।

ङ. देवि! आर्यपुत्रस्य वृत्तान्तो न कोऽप्युपलब्धस्तस्य मुखात् । स किल कलहप्रियस्त्रिभुवनं परिभ्रमति ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

रुक्मिणी—(क) हला! सुणुह सोहणं। अय्यउत्तेण वावादिदो किल सो महासुरो।

इतराः—(ख) पिअं णो पिअं णो।

लक्ष्मणा—(ग) देवि! तत्थ एव विळम्बन्तो किंत्ति चिट्ठइ अय्यउत्तो।

रुक्मिणी—(घ) हळा! दिव्वआणेण णंदणं तं समागदाओ विहिवासवप्पमुहाओ देवदाओ सह जअवुत्तंतेण (त्ति) णो कहिदं।

सत्यभामा—(ङ) ता अज्ज पच्चूसम्मि अय्यउत्तो अह्माणं णअरं अळंकरिस्सदि।

रुक्मिणी—(च) तह एव्व।

[ततः प्रविशति दिव्येन रथेन नायको मातलिश्च।]

नायकः—आर्य! मातले! भगवतो महेन्द्रस्य सम्भावनया कृतार्थमात्मानं मन्ये।

क. हला! शृणुत शोभनम्। आर्यपुत्रेण व्यापादितः किल स महासुरः।

ख. प्रियं नः प्रियं नः।

ग. देवि! तत्रैव विलम्बमानः किमिति तिष्ठत्यार्यपुत्रः।

घ. हळा! दिव्ययानेन नन्दनं तत् समागता विधिवासवप्रमुखा देवताः सह जयवृत्तान्तेन (इति) नः कथितम्।

ङ. तदद्य प्रत्यूष आर्यपुत्रोऽस्माकं नगरमलङ्करिष्यति।

च. तथैव।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मातलिः— देव ! किमुच्यते, भवदनुग्रहादविचलित-दिव्यसिंहासनः खलु भगवान् पाकशासनः ।

नायकः — नन्विदं विदर्भराजनन्दनाविलासोद्यानम् । तदत्रावतरितुमिच्छामि । [तथाकृत्वा] सूत ! सुखेन गम्यताम् ।

मातलिः— तथा । [इति सरथो निष्क्रान्तः ।]

सुशीला — (क) महाभाए ! कहिं दाणिं सा दारिआ ।

रुक्मिणी — (ख) हळा ! — अज्ज मए एव्व अणु-मदा चन्दळेहाए समं उज्जाणसिरिं पेच्छिदुं गदा ।

सत्यभामा— [सप्रणयोपालम्भम्] (ग) हळा ! तुमं वि मुद्ध-सहावा खु, जं अपरिचिदेसु णिउंजप्पदेसेसु पराकिअं दारि-अं संचारेसि ।

इतराः— (घ) एव्वं एव्व एदं ।

रुक्मिणी— [साङ्गीकारम्] (ङ) हळा ! आअच्छह । तं दारिअं आकारिऊण चिरंडिआपसाहणं करेम्ह ।

[इति सदेवीजना निष्क्रान्ता]

नायकः — [किञ्चिदुच्चैः] कात्र भोः केलीवनपालिकासु ।

क. महाभागे ! कुत्रेदानीं सा दारिका ।

ख. हला ! अद्य मयैवानुमता चन्द्रलेखया सममुद्यानश्रियं प्रेक्षितुं गता ।

ग. हला ! त्वमपि मुग्धस्वभावा खलु, यदपरिचितेषु निकुञ्ज-प्रदेशेषु परकीयां दारिकां सञ्चारयसि ।

घ. एवमेवैतत् ।

ङ. हला ! आगच्छत । तां दारिकामाकार्य चिरण्टिकाप्रसाधनं कुर्मः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

[प्रविश्य]

वनपालिका— [सप्रणामम्] (क) आणवेदु देव्वो ।

नायकः— सहकारिके! किमिदानीमपि नापचितप्रसूनकिसलयं विलासोद्यानम् ।

वनपालिका— (ख) देव्वस्स विजअमंगळानुसंधाणकाळणादो देवीहिं एत्थ एव्व मिळिदाहिं चिरंटिआप्रसाहणं सहत्थावचिदमंजरीहिं कादव्वं त्ति ।

नायकः— हन्त! परमस्मासु कल्याणपरम्परानुसन्धानप्रयाससहिष्णुता देवीनाम् । तदहमतर्कितावलोकनप्रदानेन देवीनां प्रमोदविनयलज्जासम्भ्रमव्यतिकरदशामनुभवितुमिच्छामि । न तावदावेदयतु भवती मदागमनम् । कर्णे च विदितवृत्तान्तं विधाय तमितः श्रीवत्सं प्रेषय ।

सहकारिका— (ग) तह । [इति निष्क्रान्ता]

नायकः— [सौत्सुक्यम्]

मिलितानां सुजातानां स्वच्छानां मम मानसम् ।
रत्नानामिव देवीनां वृन्दमानन्दयिष्यति ॥ ७ ॥

[पुरो निरूप्य] अहो विलासोद्यानस्य रामणीयकविलासः । इह हि ।

क. आज्ञापयतु देवः ।

ख. देवस्य विजयमङ्गलानुसन्धानकारणाद् देवीभिरत्रैव मिलिताभिश्चिरण्टिकाप्रसाधनं स्वहस्तापचितमञ्जरीभिः कर्तव्यमिति ।

ग. तथा ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अतिमधुरकण्ठनालैरभिनवसहकारकिसलयास्वादात् ।
कलकण्ठैस्तरुलतिकाः परस्परालापसुखमिवादधते ॥ ८ ॥

[निर्वर्ण्य] हन्त ! नायं कोकिलालापः । किन्तु कयोरपि कन्यकयोः सल्लापः ।

[प्रविश्य]

चन्द्रलेखा— (क) हला ! इदो इदो ।

नायकः— [सविस्मयं] कथमियं विदग्धापि प्रमुग्धेव रत्नपाञ्चालिकामालपति चन्द्रलेखा ।

[प्रविश्य]

कुवलयावली— (ख) हला ! चंदळेहे ! अकिचिमेण तुह सिणेहेण उळ्ळसिदो मे अप्पा ।

चन्द्रलेखा— (ग) हला ! सिळाहणिज्जो खु सहावसिद्धो कुवळयावळीचंदळेहाणं सिणेहाणुबन्धो ।

नायकः—

रत्नपाञ्चालिकैवेयमिति गृह्णामि चक्षुषा ।
लीलयाप्यनुमानेन नेति प्रत्येमि किन्विदम् ॥ ९ ॥

चन्द्रलेखा— [सखीं निर्वर्ण्य] (घ) हला ! तुमं अंतेउरं आणीदेण णारएण देवीणं सोभग्गगव्वो णिव्वासिदो त्ति तक्केमि ।

क. हला ! इत इतः ।

ख. हला चन्द्रलेखे ! अकृत्रिमेण तव स्नेहेन उल्लसितो मे आत्मा ।

ग. हला ! श्लाघनीयः खलु स्वभावसिद्धः कुवलयावलीचन्द्रलेखयोः स्नेहानुबन्धः ।

घ. हला ! त्वामन्तःपुरमानीतेन नारदेन देवीनां सौभाग्यगर्वो निर्वासित इति तर्कयामि ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कुवलयावली—[सप्रणयासूयम्] (क) हळा! कहं विअ। कहेहि सुणामि दाव णम्।

चन्द्रलेखा— (ख) अण्णहा कण्णआरअणं तुमं तिहुवणेक्कमळ्ळस्स खत्तिअकुमाळस्स भुअंतराळेक्कमंडणं कुणंदो माणिक्कं विअ मंजूसाए णारअमहेसी अंतेउरंमि ढकेइ।

नायकः— हन्तेयं क्षत्रियाय प्रतिपादनीया। अन्यथा कथमस्मदन्तःपुरे स्थापयति भगवान् वैरिञ्चिः। [विचिन्त्य] कथं नु खल्विदं, यदियमस्मच्चक्षुषोः प्रतीयते रत्नपाञ्चालिकैवेति।

कुवलयावली— (ग) हळा! तुमं जं किं वि आळवेहि। (से?) अहं उण तुज्झ चउराळाविणीण अहिप्पाअं ण आणामि।

चन्द्रलेखा— (घ) हळा! णवजौव्वणस्स सहआरी भअवं वम्महो एव्व सव्वं जाणाविस्सदि।

क. हला! कथमिव। कथय शृणोमि तावदेनम्।

ख. अन्यथा कन्यकारत्नं त्वां त्रिभुवनैकमल्लस्य क्षत्रियकुमारस्य भुजान्तरालैकमण्डनं कुर्वन् माणिक्यमिव मञ्जूषायां नारदमहर्षिरन्तःपुरे स्थापयति।

ग. हला! त्वं यत् किमप्यालप। अहं पुनस्तव चतुरालापिन्या अभिप्रायं न जानामि।

घ. हला! नवयौवनस्य सहकारी भगवान् मन्मथ एव सर्वं ज्ञापयिष्यति।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नायकः—

सेयमलक्षितरूपा सखीसहालापसूचितौदार्या।
सौरभविदितविशेषा केतकलतिकेव हरति मे चेतः
[॥ १० ॥

चन्द्रलेखा— (क) हळा! इदो पेच्छ मअणरज्जसंजीविणिं तुमं पेच्छितुं व ओइण्णस्स विळासुज्जाणमाहवस्स सिरिं।

कुवलयावली— (ख) [सलज्जाकौतुकम्] हळा! एतस्सिं णिउंजे ओसरिदाओ रुक्किणीवळ्ळहं विजयजेत्तादो पडिणिवुत्तं पेच्छामो अय्यउत्तम्।

चन्द्रलेखा— (ग) [आत्मगतम्] अंहो जह णामसरिसेण वंचिदा। होदु दाव। णं अणुसरिअ विणोएमि। [प्रकाशम्] जह पिअसहीए रोअदि।

[तथा कुरुतः]

कुवलयावली — [सौत्सुक्यमवलोक्य] (घ) हळा! कहिं सो महाणुभावो।

क. हला! इतः पश्य मदनराज्यसञ्जीविनीं त्वां प्रेक्षितुमिवावतीर्णस्य विलासोद्यानमाधवस्य श्रियम्।

ख. हला! एतस्मिन् निकुञ्जेऽपसृते रुक्मिणीवल्लभं विजययात्रातः प्रतिनिवृत्तं पश्याव आर्यपुत्रम्।

ग. अहो यथा नामसादृश्येन वञ्चिता। भवतु तावत्। एनामनुसृत्य विनोदयामि। यथा प्रियसख्यै रोचते।

घ. हला! कुत्र स महानुभावः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चन्द्रलेखा— (क) हळा! भणामि पुरदो वसन्तो एव्व माहवो त्ति। ता अण्णं चिंतिदं उज्झिअ पेच्छ णं।

नायकः— [सशङ्काविमर्शम्] न खलु किमिह निगूढस्थितोऽपि ज्ञातोऽहमनया विदग्धचेष्टया।

कुवलयावली— [पुनर्विलोक्य सविषादं] (ख) हळा! कहिं सो जउउळसेहरो माहवो जं पुरतो वसंतो त्ति तुमं भणासि।

चन्द्रलेखा— [सास्मितम्] (ग) हळा! मए भणिदो ऋदुउळसेहरो माहवो आरामम्मि सव्वदा दीसइ। तुए उण परिण्णादो जउउळसेहरो माहवा कहिं वा ण आणामि।

नायकः—साधु चन्द्रलेखे! साधु।

अपूर्वसंविधानेन तरङ्गितचमत्कृतेः।
पारितोषिकदानेऽहमधमर्णो भवामि ते॥ ११॥

कुवलयावली—(घ) हळा! तुए एव्वं वंचिदह्मि।

चन्द्रलेखा—(ङ) हळा! तुए एव्व तुमं वंचिदा ण उण मए। जं अत्थंतरे अहिणिविट्ठासि।

क. हला! भणामि पुरतो वसन्त एव माधव इति। तदन्यत् चिन्तितं त्यक्त्वा पश्यैनम्।

ख. हला! कुत्र स यदुकुलशेखरो माधवः, यं पुरतो वसन्निति त्वं भणसि।

ग. हला! मया भणितः ऋतुकुलशेखरो माधव आरामे सर्वदा दृश्यते। त्वया पुनः परिज्ञातो यदुकुलशेखरो माधवः कुत्र वा न जानामि।

घ. हला! त्वयैवं वञ्चितास्मि।

ङ. हला! त्वयैव त्वं वञ्चिता, न पुनर्मया। यदर्थान्तरेऽभिनिविष्टासि।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कुवलयावली—(क) हळा! सिणिद्धजणवंचणसीळाए तुह सहित्तणं विसज्जेमि। [इति पदान्तरे तिष्ठति]।

चन्द्रलेखा— [कनिष्ठिकायां गृहीत्वा] (ख) हळा! मा कुप्प णम्मकेळीए।

[कुवलयावली बलादङ्गुलीमाकृष्य पुनरपि पदान्तरे तिष्ठति।]

चन्द्रलेखा—(ग) बलिअं खु कुपिदा एसा जेण गळिअं वि मणिमुद्दिअं ण आणादि। ता णं गह्णिअ ढक्केमि। [तथा करोति]

नायकः— [सविस्मयम्]

दृष्टिप्रतिबन्धकृता मुक्ता प्रतिभाति हेतुना सेयम्।
झटिति (च) वनितावरणा शस्त्रैः शातेव शम्बराराते: ॥१२॥

हन्त फलितोऽयमस्माकमनुसरणव्यापारः। यतः,

सञ्चारिणी रतिपतेरिव वैजयन्ती
साक्षात्कृता रतिपतेरधिदेवतेव।
मूर्ता जगज्जनदृशामिव भाग्यरेखा
शातोदरी नयनगोचरतामुपैति ॥ १३ ॥

[चिरं निर्वर्ण्य] न खल्वियं स्त्रीमात्रम्। किन्तु

कुसुमायुधलक्ष्मीर्वा मोहनविद्याविलासरेखा वा।
सौभाग्यकन्दली वा

क. हला! स्निग्धजनवञ्चनशीलायास्तव सखीत्वं विसर्जयामि।

ख. हला! मा कुप्य नर्मकेल्या।

ग. बलीयः खलु कुपितैषा। येन गलितामपि मणिमुद्रिकां न जानाति। तदेनां गृहीत्वा स्थापयामि।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

किं बहुना —

मम लोचनभाग्यदेवतैवेयम् ॥ १४ ॥

[विचिन्त्य] जातविस्रम्भयोरनयोरहमात्मानं दर्शयामि। [तथा करोति]

[चन्द्रलेखा नायकं विलोक्य सहर्षसम्भ्रमं प्रणमति]

नायकः — [सप्रसादम्] सखि! कुशलमन्तःपुरचारिणे जनाय।

चन्द्रलेखा — (क) अज्ज देवस्स विजयलच्छीवल्लहस्स पआरविंददंसणेण।

कुवलयावली — (ख) [विलोक्य स्वगतम्] अहो सुन्देरविसेसो जउदेवस्स। [सानुरागं निर्वर्ण्य] अतिमेत्तसंमोहणत्तणं आकिदिविसेसस्स। (इत्यवलोकयति)।

चन्द्रलेखा — [आकूतमस्याः परिज्ञायात्मगतम्] (ग) अहो इअं भट्टारअंमि अणुरत्तळोअणा संवुत्ता। अहवा जुज्जइ खु चंदम्मि राओ चंदिआए

कुवलयावली — (घ) हला! एहि देवीए समीपं गच्छामो। [इति सखीमाकर्षति]

क. अद्य देवस्य विजयलक्ष्मीवल्लभस्य पदारविन्ददर्शनेन।

ख. अहो सौन्दर्यविशेषो यदुदेवस्य। अतिमात्रसम्मोहनत्वमाकृतिविशेषस्य।

ग. अहो इयं भट्टारकेऽनुरक्तलोचना संवृत्ता। अथवा युज्यते खलु चन्द्रे रागश्चन्द्रिकायाः।

घ. हला! एहि देव्याः समीपं गच्छावः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चन्द्रलेखा — (क) हळा! भट्टिणा अविसज्जिदा कहं गच्छेमि। ता विण्णवेहि भट्टारअं। एसा विसज्जीअदु त्ति।

कुवलयावली— [सकृत्रिमसंरम्भं सखीं विसृज्य द्वित्राणि पदानि गत्वा पदस्खलितमभिनीय, आत्मगतम्] (ख) अंहो मज्झ चरणा इदोमुहं णप्पसरंति। [परिवृत्य प्रकाशम्] हळा! ण विसुमरेहि एदं अविणअं। देवीए विण्णवेमि।

चन्द्रलेखा — (ग) हळा! ण विसुमरेमि। तुमं गच्छ दाव।

कुवलयावली —(घ) हळा! एहि त्ति। [सविनयं सखीमाकर्षति।]

नायकः — [आत्मगतम्]

क्षणविनयरोषपरिगतिरकथितकथनेन सूचिताकूता।
कन्या विस्रम्भकथासुकृतबद्धं तत् सुखयति स्वान्तम्
॥ १५ ॥

क. हला! भर्त्रा विसर्जिता कथं गच्छामि। तद् विज्ञापय भट्टारकम्, एषा विसृज्यतामिति।

ख. अहो स्तब्धचरणावितोमुखं न प्रसरतः। हला! न विस्मरैतमविनयम्। देव्यै विज्ञापयामि।

ग. हला! न विस्मरामि। त्वं गच्छ तावत्।

घ. हला! एहीति।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

[प्रकाशम्] चन्द्रलेखे! भवत्योर्माधवश्रीविलोकनान्तरायो मा भूत्। यतो वयमपसरामः।

चन्द्रलेखा — [जनान्तिकम्] (क) हळा! उज्जाणंतरिदेण भट्टिणा आअण्णिदपुव्वो एव्व अह्माणं वीसम्भसंवादो।

कुवलयावली — [सासूयम्] (ख) हळा! तुह सिळिट्ठवादप्पओएण अतिमेत्तं ळहूकअं ह्मि।

चन्द्रलेखा — (ग) हळा! तुह परिक्खळिदवादप्पओएण अहं वि आतिमेत्तं ळहूकअं ह्मि।

[कुवलयावली सव्रीडस्मितं नम्रमुखी तिष्ठति]

[नेपथ्ये]

(घ) हळा चंदळेहे! किअच्चिरं कुवळआवळिं वणसंचारेण आआसिदं करेसि त्ति देवी कुप्पइ। ता आणेहि णं।

[सर्वा आकर्णयन्ति।]

चन्द्रलेखा — (ङ) अणुजाणादु देव्वो अह्मे गमणस्स।

क. हला! उद्यानान्तरितेन भर्त्राकर्णितपूर्व एवास्माकं विस्रम्भसंवादः।

ख. हला! तव श्लिष्टवादप्रयोगेणातिमात्रं लघूकृतास्मि।

ग. हला! तव परिस्खलितवादप्रयोगेणाहमप्यतिमात्रं लघूकृतास्मि।

घ. हला चन्द्रलेखे! कियच्चिरं कुवलयावलीं वनसञ्चारेणायासितां करोषीति देवी कुप्यति। तदानयैनाम्।

ङ. अनुजानातु देव आवयोर्गमनस्य।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नायकः — भद्रे गम्यतां पुनरागमनाय ।

[उभे सभयसम्भ्रमं निष्क्रान्ते ।]

नायकः — [विलोक्य] कथमशाड्वलेऽपि बालयवसाभिलाषी लीलामृगः । [निरूप्य] हन्तेयं मरतकमणिमुद्रिका । [गृहीत्वा निर्वर्ण्य सविस्मयम्] कथमत्र मणेरन्तरा छायाच्छलादक्षरपङ्क्तिः ।

कन्या करेण मणिमुद्रिकयाङ्कितेन
पाञ्चालिकाभ्रममियं विदधीत पुंसाम् ।
मुद्रापि यस्य भुवि गच्छति दृश्यभाव-
मस्याः करग्रहणमङ्गलमेष यायात् ॥ १६ ॥

इति ।

[विचिन्त्य]

नूनमस्याः प्रभावेन सा तथा वामलोचना ।
रत्नपाञ्चालिकाभ्रान्तिमकरोन्मम चक्षुषोः ॥ १७ ॥

नूनमेतदन्वेषणाय सखीसमेता कुवलयावली पुनरिमं प्रदेशमायास्यति । तदिहैव मुहूर्तमनालक्षितस्तामनुपालयामि ।

[इति निष्क्रान्ताः सर्वे ।]

॥ प्रथमोऽङ्कः ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ द्वितीयोऽङ्कः।

[ततः प्रविशति विदूषकः]

विदूषकः— (क) अहो रहस्सो त्ति कहिदस्स पिअवअस्सागमणस्स रक्खणादो मह जठरो नीसासरोहेणेव पूरिज्जइ। ता विअणम्मि इमस्सिं विळासुज्जाणे हस्सपूरं किं वि परिवाहइस्सम्। ही ही णिज्जिदं पिअवअस्सेण। परिणमिअं अह्माणं भाअहेएण। अज्ज दीसइ विळासुज्जाणवासम्मि विअअळच्छीपिअसहो वयस्सो। [इति हर्षेण नृत्यन् सशङ्कं विरम्य] अह्मे मंतरक्खणे बुद्धिप्पमादो मज्झ। जं अन्तेउरपरिचारिकासंचरणजोग्गे उज्जाणम्मि गोवणिज्जं आघोसेह्मि। [विलोक्य] एसो खु पिअवयस्सो णं उपसप्पामि।

[प्रविश्य]

नायकः— [मुद्रिकां निर्वर्णयन्]

तिरयसि यन्मधुरगिरो
लावण्यं मदनराज्यमुद्रायाः।
दुरितेन तेन मुद्रे!
स्वपदपरिभ्रंशमुपगता भवती ॥ १ ॥

क. अहो! रहस्यमिति कथितस्य प्रियवयस्यागमनस्य रक्षणान्मम जठरो निःश्वासरोधेनेव पूर्यते। तद् विजनेऽस्मिन् विलासोद्याने हर्षपूरं किमपि परिवाहयिष्यामि। ही ही निर्जितं प्रियवयस्येन। परिणतमस्माकं भागधेयेन। अद्य दृश्यते विलासोद्यानवासे विजयलक्ष्मीप्रियसखो वयस्यः। अहो! मन्त्ररक्षणे बुद्धिप्रमादो मम। यदन्तःपुरपरिचारिकासञ्चरणयोग्य उद्याने गोपनीयमाघोषयामि। एष खलु प्रियवयस्यः तमुपसर्पामि।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विदूषकः — [उपसृत्य] (क) विअअलच्छिपरिग्गहेण वड्ढइ पिअवअस्सो ।

नायकः— [विलोक्य] सखे! सुखेन स्थीयते ।

विदूषकः — (ख) अज्ज पिअवअस्सस्स मुहारविंद-संदंसणेण । अज्ज मे सुदिणं जादं ।

नायकः — सखे! श्रीवत्स !

वरतनुमनिरीक्ष्य कन्यकां
कुसुमशरासनविकासदेवताम् ।
नयनयुगफलं न लब्धवान्
यदिह विलम्ब्य समागतो भवान् ॥ २ ॥

श्रीवत्सः — [सकौतुकम्] (ग) किं (एत्थ ?) एत्थ तुए विलोइदा अज्ज ।

नायकः —अथकिम् । सखे कदाचिदपि तां विलोक-यिता भवानिति यथानुभवमेव ते निवेदयामि ।

नितम्बो बिम्बेन प्रहसति रथाङ्गं रतिपतेः
करग्राह्यो मध्यस्त्रिवलिपरिणद्धो वरतनोः ।
समाक्रान्तोपान्तं कुचयुगलमाकीलितमिव
स्वभावादालोले प्रसृतिपरिमेये च नयने ॥ ३ ॥

क. विजयलक्ष्मीपरिग्रहेण वर्धते प्रियवयस्यः ।

ख. अद्य प्रियवयस्यस्य मुखारविन्दसन्दर्शनेन । अद्य मे सुदिनं जातम् ।

ग. किमत्र त्वया विलोकिताद्य ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीवत्सः—(क) अहो णिब्भरत्तणं जौव्वणस्स ।

नायकः—सखे निवेद्यते खलु परस्मै यत्तु जातमस्पृष्टपूर्वमुपमानेन तत् खलु निरवद्यं दुर्लभम् ।

पद्मं पङ्कनिकेतनं करिकराबाबाल्यतः कर्कशौ
रौक्ष्यं वायसशिक्षया परिगताः पुंस्कोकिलानां गिरः ।
मीनानां जडसङ्गतिः सितरुचेः सा पूर्णता पाक्षिकी
तन्मन्ये तरलेक्षणा न लभते स्वाङ्गोपमानं मनाक् ॥ ४॥

श्रीवत्सः—[स्वगतम्] (ख) अहो बळिअं खु अहिणिवेसो णवदंसणे जणे पिअवअस्सस्स । ता ओसरं णो दाइस्सं दाव । [प्रकाशम्] भो राआणो णवप्पिआ होंति त्ति दाणिं सच्चो ळोअवादो । जं तुमं सअळगुणसिळाहणिज्जं देवीजणं अवमण्णिअ जं कं वि कण्णअं अहिणंदासि । अहवा पसिद्धं खु एदम् ।

अण्णस्सिं वसइ गुणो पहूण चित्तं खु रमइ अण्णस्सिं ।
कमळे खंडिअपेम्मा चंदो कुमुदं पसाएदि ॥ ५ ॥

क. अहो निर्भरत्वं यौवनस्य ।

ख. अहो बलवान् खल्वभिनिवेशो नवदर्शने जने प्रियवयस्यस्य । तदवसरं न दास्यामि तावत् । भोः ! राजानो नवप्रिया भवन्तीतीदानीं सत्यो लोकवादः । यत् त्वं सकलगुणश्लाघनीयं देवीजनमवमत्य यां कामपि कन्यकामभिनन्दसि । अथवा प्रसिद्धं खल्वेतत् ।

अन्यस्मिन् वसति गुणः प्रभूणां चित्तं खलु रमतेऽन्यस्मिन् ।
कमले खण्डितप्रेमा चन्द्रः कुमुदं प्रसादयति ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नायकः—सखे! वस्तुगुणविशेषो विवेकिनां सौहार्द-मुत्पादयति ।

श्रीवत्सः—(क) तुज्झ कामं णीदो विवेओ पुराणमळ-सेअपिंछिळचिउरबंधेसु घोसकुळपुरंधिअणेसु चोरिअरआ-हिळासेण जाणिदो एव्व ।

नायकः—सखे! तवायं किमाशयः, यदियमस्मन्मनो-रथभूराभिरूप्येण न देवीजनस्य तुल्येति ।

श्रीवत्सः—(ख) तह एव्व । जह पिअवअस्सो वक्खाणं करेइ ।

नायकः—सर्वातिशायि तस्या लावण्यमसाक्षात्कुर्वतो भवतो यदुचितं तदभिदधासि । किं बहुना, श्रूयताम्—

[1]विलोलभ्रूवीचेर्विचलितकटाक्षोत्पलवनात्
कनद्ग्रीवाकम्बोः कुचयुगलचक्राङ्कमिथुनात् ।
लताङ्ग्या लावण्यादमृतसरसः कैरपि कणै-
र्विकीर्णैरन्यासां रुचिमकृत धातेति कलये ॥ ६ ॥

क. तव कामं नीतो विवेकः पुराणमलसेकपिच्छिलचिकुरबन्धेषु घोषकुलपुरन्ध्रीजनेषु चौर्यरताभिलाषेण ज्ञात एव ।

ख. तथैव । यथा प्रियवयस्यो व्याख्यानं करोति ।

---

१. 'विलोलभ्रूवीचेर्विरचितकटाक्षोत्पलवनात्' क. पाठः.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीवत्सः— [सप्रत्ययादरम्] (क)

भद्दस्सहस्सअंतेउरपइणो तुज्झ हरइ जा चित्तं ।

सा (इळ) ळळणारअणं अणग्घं खु (होदि) माणिक्कं ॥

अह से तुमं उद्दिसिअ कीरिसो दिट्ठिविसेसो ।

नायकः—

अभिलाषो वामाक्ष्याः

प्रदीप इव यवनिकाप्रकाशाभ्याम् ।

मन्दाक्षमन्मथाभ्यां

न च प्रतीतो न चाप्रतीतश्च ॥ ८ ॥

तदानीं खलु

प्रत्यालोकनलालसैरपि सखे मन्दाक्षमन्दीकृतैः

सव्याजं प्रविसारितैरपि परं कातर्यपर्याकुलैः ।

संवादे परिवर्तितैरनुपदं गाम्भीर्यसम्प्रेक्षितैः

विक्रीतोऽस्मि विलोकितैर्वरतनोराकूतकर्णेजपैः ॥ ९ ॥

श्रीवत्सः—(ख) भो वअस्स! एआरिसो अहिळासो । इदो [1] परं सा तुए किं उपेक्खिदव्वा ।

नायकः—सा किल भगवता नारदेन परिन्यासीकृता विदर्भराजनन्दनाया वशे वर्तते ।

क. भद्रसहस्रान्तःपुरपतेस्तव हरति या चित्तम् ।
सा (किल) ललनारत्नमनर्घं खलु भवति माणिक्यम् ॥
अथ तस्यास्त्वामुद्दिश्य कीदृशो दृष्टिविशेषः ।

ख. भो वयस्य! एतादृशोऽभिलाषः । इतः परं सा त्वया किमुपेक्षितव्या ।

---

1. 'अपरं ति सा' क. पाठः.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीवत्सः—(क) ता तुज्झ एदस्सि अहिळासो पण्णगीए फणारअणाहिळासो व्व दुळ्ळहो त्ति तक्केमि ।

नायकः—[सनिःश्वासम्] सखे! श्रीवत्स! तावदास्तामनवधेः सुकृतशेवधेः परिणामस्तावानभिलाषः । किन्तु

सकृदपि पुनरक्ष्णोर्हारि किं सन्निकर्षे
प्रणयपिशुननानाभावसम्भेदरम्यम् ।
शिव शिव यदि तस्या वक्त्रमालोकयेयं
स हि मम सुकृतानां सञ्चितानां विपाकः ॥ १० ॥

[ततः प्रविशति पटाक्षेपेण कुवलयावली चन्द्रलेखा च ।]

चन्द्रलेखा—(ख) हळा मंदबुद्धीए *अमिदा मणिमुद्दिआ आसण्णसंचारिणो भट्टिणो दंसणपहे पडिस्सदि । अहवा अण्णस्स वेत्ति आउळह्मि ।

कुवलयावली—[आत्मगतम्] (ग) कुदो तारिसं भाअहेअं कुवळआवळीए । जेण सो महाणुभाओ मणिमुद्दिअं पुळइ । [प्रकाशम्] हळा ता तुवरिदं गदुअ अण्णेसामो ।

[इति परिक्रामतः ।]

क. तत् तवैतस्यामभिलाषः पन्नग्याः फणारत्नाभिलाष इव दुर्लभ इति तर्कयामि ।

ख. हला! मन्दबुद्ध्या आनिता मणिमुद्रिकासन्नसञ्चारिणो भर्तुर्दर्शनपथे पतिष्यति । अथवान्यस्य वेत्यकुलास्मि ।

ग. कुतस्तादृशं भागधेयं कुवलयावल्याः । येन स महानुभावो मणिमुद्रिकां पश्यति । हला! तत् त्वरितं गत्वान्विष्यावः ।

---

* भामिदा इति स्यात् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीवत्सः—(क) भो वअस्स! तूण्हीं चिट्ठ। एसो खु विस्संभगोट्ठीणिळअस्स दुट्ठदासीपुत्तळस्स सळ्ळावो विअ सुणीअदि।

नायकः— नूनमियं मणिमुद्रिकान्वेषणाय समागता सवयस्या कुवलयावली भविष्यति। सखे! निकुञ्जपुञ्जपिहितावालोकयावः। [तथा कुरुतः।]

श्रीवत्सः—(ख) का वा मणिमुद्दिआ। किं वा समण्णिसंतित्ति ण आणामि।

नायकः—सखे! कुवलयावल्या मणिमुद्रिका केनापि हेतुना परिभ्रष्टा मया दृष्टा [इति मणिमुद्रिकां दर्शयति।]

श्रीवत्सः— [निर्वर्ण्य] (ग) वअस्स! कुदो एत्थ मणिमुद्दिआ।

नायकः— [स्वगतम्] अहो सामर्थ्यमचिन्तनीयं तपोविशेषस्य। येनायं मया दर्शितामपि मुद्रिकां न पश्यति। [प्रकाशम्] विदितमधुना तव ब्राह्मण्यमस्माभिः। यदियमनधीतसन्ध्याविधिना न लक्ष्यते मुद्रिकेति लिखितमत्रैव।

क. भो वयस्य! तूष्णीं तिष्ठ। एष खलु विस्रम्भगोष्ठीनिलयस्य दुष्टदासीपुत्रकस्य संलाप इव श्रूयते।

ख. का वा मणिमुद्रिका, किं वा समन्विष्यन्तीति न जानामि।

ग. वयस्य कुतोऽत्र मणिमुद्रिका।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीवत्सः— (क) केणेदं अहिलिहिदं ।

नायकः— सखे! ब्रह्मर्षिणा नारदेन ।

श्रीवत्सः—(ख) भो! महाराज! तुमं विणा को अण्णो वीणागाअकस्स तस्स बंह्मबंधुणो वअणं पमाणं करिअ सिरिवस्सं अहिक्खिवति ।

नायकः— अनयैव निवेद्यते तत्रभवतो भवतश्च शक्तितारतम्यम् ।

श्रीवत्सः—(ग) अहो तुज्झ वअस्सस्स सत्तितारतम्मपरिण्णाणं । जं तुह पसाएण पच्चूसम्मि साअं अ अमिअसक्करखंडमोदअसदं खादंतो सिरिवस्सो सत्तिहीणो । सो उण कंदमूलपलासणो णारदो सत्तिमंतो त्ति आळविज्जइ । [ससंरम्भं वामसुष्टिमुद्यम्य] भो! महाराअ! तं सत्तिमंतं इहाणेहि सिग्घं । मह एक्कमुट्ठिणा महेसिं महिम्मि पाडइस्सं । अण्णहा इमं जण्णसुत्तं छिण्णं काऊण परिक्खिवामि । [इति यज्ञसूत्रस्थानं परामृशन् सविषादमात्मगतम्] हरिसणच्चणावसरे

क. केनेदमभिलिखितम् ।

ख. भो महाराज! त्वां विना कोऽन्यो वीणागायकस्य तस्य ब्रह्मबन्धोर्वचनं प्रमाणं कृत्वा श्रीवत्समधिक्षिपति ।

ग. अहो! तव वयस्यस्य शक्तितारतम्यपरिज्ञानम् । यत् तव प्रसादेन प्रत्यूषे सायं चामितशर्कराखण्डमोदकशतं खादन् श्रीवत्सः शक्तिहीनः । स पुनः कन्दमूलफलाशनो नारदः शक्तिमानित्यालप्यते । भो महाराज! तं शक्तिमन्तमिहानय शीघ्रम् । ममैकमुष्टिना महर्षिं मह्यां पातयामि । अन्यथेदं यज्ञसूत्रं छिन्नं कृत्वा परिक्षिपामि । हर्षनर्तनावसर

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

एव्व छिण्णं भिण्णं जण्णसुत्तं। ता अण्णदो पसंगं करेमि। [विलोक्य] भो! एसा खु चंदलेहा। का उण इअं अण्णतरा। [विचिन्त्य] भो! मए परिण्णादं। कुविदं मं अणुणेदुं विळासवणदेवदा सअं एइ। अहवा तुमं जअलच्छीसहिदं अहिणंदिदुं एव्व एइ।

नायकः— [सस्मितम्] सखे! सेयं मया कथिता कुवलयावली नाम। न पुनर्वनदेवता।

श्रीवत्सः— (क) अच्चरिअं अच्चरिअं। अपुव्वा ईरिसी सोभग्गळच्छी माणुसीसु। वअस्स! ठाणे खु दे दिट्ठी सज्जइ।

चन्द्रलेखा— [अभितो विचित्य सविषादम्] (ख) हळा ण दीसइ मुद्दिआ। किं करेह्मि।

कुवलयावली— [अश्रुतिमभिनीय, आत्मगतम्] (ग) अइ चित्त! तुमं सहीए आसंकिदमेत्तेणेव्व किंत्ति अप्पाणं किदत्थं चिंतेसि।

एव छिन्नं भिन्नं यज्ञसूत्रम्। तदन्यतः प्रसङ्गं करोमि। भोः एषा खलु चन्द्रलेखा। का पुनरियमन्यतरा। भो मया परिज्ञातम्। कुपितं मामनुनेतुं विलासवनदेवता स्वयमेति। अथवा त्वां जयलक्ष्मीसहितमभिनन्दितुमेवैति।

क. आश्चर्यमाश्चर्यम्। अपूर्वेदृशी सौभाग्यलक्ष्मीर्मानुषीषु। वयस्य! स्थाने खलु ते दृष्टिः सज्जते।

ख. हला न दृश्यते मुद्रिका। किं कुर्वः।

ग. अयि चित्त! त्वं सख्या आशङ्कितमात्रेणैव किमित्यात्मानं कृतार्थं चिन्तयसि।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चन्द्रलेखा— [आत्मगतम्] (क) कहं एसा अण्णचित्ता ण मे वअणं अहिमण्णेइ । [प्रकाशम्] हळा णं भणामि एत्थ रअणाळंकारो ण दीसइ त्ति ।

कुवलयावली— (ख) ण केवळं रअणाळंकारो ।

चन्द्रलेखा— (ग) किं उण अण्णं ।

कुवलयावली— [आत्मगतम्] (घ) अहो चित्तस्स मे अधीरत्तणं । जं रअणगब्भाळंकारो सो वि महाभाओ ण दीसइ त्ति (इ?)आढ(उ?)त्तम्मि । होदु एव्वं दाव । [प्रकाशम्] हळा रअणाळंकारहारिणो जणस्स चरणविण्णासो वि ण दीसइ ।

चन्द्रलेखा—(ङ) भट्टिणो एव्व चरणविण्णासो दीसइ ण उण अण्णस्स जणस्स ।

कुवलयावली— [सनर्मस्मितम्] (च) हळा जुज्जइ इमस्सिं तुह आसंका । जं सो किल काळिंदीजळविहारिणीणं वळ्ळवणिअंबिणीणं अंबरचोरो त्ति सुणीअदि ।

क. कथमेषान्यचित्ता न मे वचनमभिमन्यते । हला ननु भणाम्यत्र रत्नालङ्कारो न दृश्यत इति ।

ख. न केवलं रत्नालङ्कारः ।

ग. किं पुनरन्यत् ।

घ. अहो चित्तस्य मे अधीरत्वं, यद् रत्नगर्भालङ्कारः सोऽपि महाभागो न दृश्यत इत्यारब्धासि । भवतु एवं तावत् । हला रत्नालङ्कारहारिणो जनस्य चरणविन्यासोऽपि न दृश्यते ।

ङ. भर्तुरेव चरणविन्यासो दृश्यते न पुनरन्यस्य जनस्य ।

च. हला ! युज्यतेऽस्मिन् तवाशङ्का । यत् स किल कालिन्दीजलविहारिणीनां वल्लवनितम्बिनीनामम्बरचोर इति श्रूयते ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नायकः— सखे! लब्धावसरोऽस्मीति प्रकाशो भवितुमिच्छामि।

श्रीवत्सः— (क) खंडमोदए हत्थगदे किं जीहाणिअंतणेण।

[उभावुपसर्पतः।]

नायकः—

पद्भ्यां पद्मरुचिं निषङ्गसुषमां जङ्घाश्रिया धून्वती-
मूरुभ्यां कदळीप्रभामुरसिजद्वन्द्वेन कुम्भश्रियम्।
पूर्णेन्दुद्युतिमाननेन विदितं मुग्धे! स्वयं मुष्णतीं
मामेवं विपरीतभाषिणि! वृथा पाटच्चरं भाषसे॥ ११॥

अथवा चोरो भवामि तावदहम्।

चोरस्यापि धनं हस्ते हरन्ती कुटिलेक्षणे।
चौर्यविद्याविशेषेण मामतिक्रम्य वर्तसे॥ १२॥

पश्य,

ऊरुभ्यां करभोरु! चोरयसि मे कौमोदकीविभ्रमं
नाभिस्ते नतनाभि! चक्रसुषमामाक्रामतिच्छद्मना।
कण्ठस्ते कळकण्ठि! वञ्चयति मे तां पाञ्चजन्यप्रभां
चारुभ्रूलतया चकोरनयने! मुष्णासि शार्ङ्गश्रियम्॥ १३॥

क. खण्डमोदके हस्तगते किं जिह्वानियन्त्रणेन।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कुवलयावली— [सलज्जासाध्वसं सखीमन्तर्धाय, आत्मगतम्] (क) अहो! पुरुसोत्तमस्स समाळावचातुरी । [जनान्तिकं] हळा! णिवारेहि णं पसंगंतरेण ।

चन्द्रलेखा— (ख) भट्टारअ! एसा इदं विण्णवेदि । तारिसीए मह अंतरंगं चोरेंतो महाराओ एक्को सरिसो चोरो त्ति ।

कुवलयावली— (ग) अवेहि दुव्ळळिदे! अवेहि । अए अकहिदं कहेसि । [इति सखीमधिक्षिप्य पराङ्मुखी तिष्ठति ।]

श्रीवत्सः— (घ) चंदळेहे! अंतरंगचोरत्तणं समाणं एव्व दोणं एदाणं ।

चन्द्रलेखा— (ङ) अहिअं खु मुद्दिआहरणं तुह्मेसु ।

कुवलयावली— [सप्रसादस्मितं सखीमवलोकयति ।]

नायकः— [नायिकायाः पुरो भूत्वा] यदीयं त्वदीया स्वर्णविन्यासा मुद्रिका तदादीयताम् । [इति स्वकरस्थितां मुद्रिकां दर्शयति ।]

क. अहो! पुरुषोत्तमस्य समालापचातुरी । हला! निवारयैनं प्रसङ्गान्तरेण ।

ख. भट्टारक! एषेदं विज्ञापयति । तादृश्या ममान्तरङ्गं चोरयन् महाराज एकः सदृशश्चोर इति ।

ग. अपेहि दुर्ललिते! अपेहि । अये अकथितं कथयसि ।

घ. चन्द्रलेखे! अन्तरङ्गचोरत्वं समानमेव द्वयोरेतयोः ।

ङ. अधिकं खलु मुद्रिकाहरणं युष्मासु ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नायिका — [विलोक्य सहर्षमात्मगतम्] (क) अहिलिहिदक्खरा मुद्दिआ उवलद्धा महाभाएण । [हृदयमुद्दिश्य] अइ हिअअ! दाणिं मणोरहो तुह ईरिसो अंकुरिदो । [मुद्रिकामादातुमिच्छति । कराग्रकम्पमभिनीय जनान्तिकम्] हळा वेवइ मे अग्गहत्थो । ता तुमं गेह्ण एदं ।

चन्द्रलेखा — (ख) हळा! भट्टिणा अ चोरिअंतरंगाए तुह किंत्ति वेवंतो होइ अग्गहत्थो ।

कुवलयावली — (ग) हळा! किं त्ति मं ळज्जिदं ळज्जेसि ।

चन्द्रलेखा — (घ) भट्टारअ! इतो मुद्दिअं पसादेइ ।

श्रीवत्सः — (ङ) भो! अहं भणामि । अण्णस्स धणं अण्णस्स हत्थे ण होदु ।

नायकः — [सस्मितम्] चन्द्रलेखे! न्याय्य एवायं पन्थाः यदाह विद्वानयं श्रीवत्सः ।

चन्द्रलेखा — (च) हळा! सअं एव्व गह्ण ।

क. अभिलिखिताक्षरा मुद्रिकोपलब्धा महाभागेन । अयि हृदय! इदानीं मनोरथस्तवेदृशोऽङ्कुरितः । हला! वेपते मेऽग्रहस्तः । तत् त्वं गृहाणैनाम् ।

ख. हला! भर्त्रा च चेरितान्तरङ्गायास्तव किमिति वेपमानो भवत्यग्रहस्तः ।

ग. हला! किमिति मां लज्जितां लज्जयसि ।

घ. भट्टारक! इतो मुद्रिकां प्रसादय ।

ङ. भोः! अहं भणामि । अन्यस्य धनमन्यस्य हस्ते न भवतु ।

च. हला! स्वयमेव गृहाण ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कुवलयावली — [कथञ्चित् करं प्रसारयति ।]

नायकः — भद्रे! कनीयसीमङ्गुलीं प्रसारय । स्वयमेव मुद्रिकामारोपयामि ।

कुवलयावली — [आत्मगतम्] (क) अज्ज का गई ।

चन्द्रलेखा — [सप्रणयकोपम्] (ख) हळा! तत्थ एव्व किअच्चिरं विळम्बेसि ।

कुवलयावली — [कथञ्चिदङ्गुलीं प्रसारयति ।]

नायकः — [कनीयसीमङ्गुलीमवलम्व्य शनैरस्या मुखं साकूतमवलोकयति।]

कुवलयावली — [सरोमाञ्चसितं नतमुखी तिष्ठति ।]

[नेपथ्ये]

(ग) हळा चंदळेहे! किअच्चिरं णववत्थुदंसणकुदूहळेण कुवळआवळिं विणोदेसि । किअच्चिरं पिअपसाहणा देवी अब्भंतरं गदा । अण्णेसंती वि तुह्मे अहं णो पेच्छामि ।

चन्द्रलेखा — [आकर्ण्य] (घ) अंहो चओरि(आ) इदो आअच्छदि ।

[राजा कुवलयावलीं विसृज्य मुद्रिकां पातयन् सवयस्यस्तिरोहितस्तिष्ठति ।]

क. अद्य का गतिः ।

ख. हला! तत्रैव कियच्चिरं विलम्बसे

ग. हला चन्द्रलेखे! कियच्चिरं नववस्तुदर्शनकुतूहलेन कुवलयावलीं विनोदयसि । कियच्चिरं प्रियप्रसाधना देवी अभ्यन्तरं गता । अन्विष्यन्त्यपि युवाम् अहं न पश्यामि ।

घ. अहो चकोरिका इत आगच्छति ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

[प्रविश्य]

चकोरिका — हळा! चंदलेहे! किअच्चिरं [इत्यादि पठति।]

चन्द्रलेखा — (क) इदो इदो पिअसही।

चकोरिका — [उपसर्पति।]

चन्द्रलेखा — (ख) हळा सहीए मणिमुद्दिआ परिब्भट्ठा। तं अण्णेसामो। [सर्वा मुद्रिकामन्विष्यन्ति।]

चन्द्रलेखा — [निर्वर्ण्य सहर्षम्] (ग) इअं मुद्दिआ [इति गृहीत्वा] हळा! एहि गच्छामो। [इति परिक्रामन्ति।]

नायकः — कथं प्रयात्येव प्रियतमा।

नायिका — [नयने परागपातमभिनीय] (घ) हळा! कुसुमरयसंपादेण आउळं मह णेत्तं।

चन्द्रलेखा — [जनान्तिकम्] (ङ) कुसुमसरसंपादेण तुह चित्तं वि। [इति परागमपनयति।]

कुवलयावली — [सप्रियासूयमिव] (च) हळा! दाणिं वि मे ण होइ लोअणं अवराअं।

क. इत इतः प्रियसखी।

ख. हला! सख्या मणिमुद्रिका परिभ्रष्टा। तामन्विष्यावः।

ग. इयं मुद्रिका। हला! एहि गच्छामः।

घ. हला! कुसुमरजःसम्पातेनाकुलं मम नेत्रम्।

ङ. कुसुमशरसम्पातेन तव चित्तमपि।

च. हला! इदानीमपि मे न भवति लोचनमपरागम्।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चन्द्रलेखा — (क) हळा! पराओ णिग्गदो णअणादो। रागो खु बळिअं संकंतो दाणिं वि रमइ। ता किं विळम्बेण। एहि गच्छह्मो। [इति निष्क्रान्ताः ।]

श्रीवत्सः — (ख) वअस्स! महुरा खु सक्करेव्व परुसा (ए?)वि दाणिं सिळिट्ठसळ्ळावगोट्ठी ।

नायकः — मधुरेति किमुच्यते।

ललितकविताविलासाः श्रुतिमधुरालापरागसम्भेदाः ।
युवतिजनपक्षपाता नाकृतपुण्येषु समवेताः ॥ १४ ॥

सखे! किमतःपरं करणीयमस्माकम् ।

श्रीवत्सः — (ग) किं अण्णं सअळणाअरिअळोअणाणंदादो ।

नायकः — यथाभिरुचितं प्रियवयस्याय । [इति परिक्रामन् सस्मरणम्]

उत्फुल्लगण्डमण्डलमुल्लसितदृगन्तसूचिताकूतम् ।
नमयन्त्यापि मुखाम्बुज*मुन्नमितानङ्गसाम्राज्यम् ॥ १५ ॥

[इति निष्क्रान्ताः सर्वे ।]

॥ द्वितीयोऽङ्कः ॥

क. हला! परागो निर्गतो नयनात् । रागः खलु बलवान् सङ्क्रान्त इदानीमपि रमते। तत् किं विलम्बेन। एहि गच्छावः।

ख. वयस्य! मधुरा खलु शर्करेव परुषापीदानीं श्लिष्टसल्लापगोष्ठी ।

ग. किमन्यत् सकलनागरिकलोचनानन्दात् ।

---

* उन्नमितेति ण्यन्तात् कर्मणि लुट् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ तृतीयोऽङ्कः ।

[ततः प्रविश्य]

कञ्चुकी — [आत्मनो दशामनुसन्धाय]

'रुन्धानया बहुमुखीं गतिमिन्द्रियाणां
वध्वेव गाढमनया जरयोपगूढः ।
अङ्गेन वेपथुमता च जडेन चाहं
गन्तुं पदादपि पदं *गमितुं न चालम् ॥ १ ॥

हन्त विश्वासो नु प्रभूणामाश्वासमुत्पादयति ।

लक्ष्येषु पाणिपरिवेषमवेक्ष्य तेषु
श्वासावधि त्रिचतुरेषु पदेषु यानम् ।
मैत्री गिरां श्रवसि तारतरश्रुतीनां
देवी तथापि हितकर्मणि मां नियुङ्क्ते ॥ २ ॥

अद्य खलु विदर्भराजनन्दनया सबहुमानमेवमाख्यातोऽस्मि । 'आर्य बभ्रुमुख! पुरा किल कालयवनविजयाय गच्छता आर्यपुत्रेण सङ्कल्पितमासीद् 'भगवति! भवानि! [1] रैवतककन्दरकदम्बवनवासिनि! प्रतिनिवर्तनानन्तरमेव मया निखिलपुरन्ध्रिजनानुयातदेवीजनेन तव यात्रामहोत्सवः कारयितव्य इति । तदद्य वयमितो रैवतकमुपसरामः । कुवलयावली पुनरुद्यानविलोकनायासेन बलवदस्वस्थशरीरेति गृह एव चन्द्रलेखया समं निवेशिता । सेयं यथा न

1. 'रैवतककन्दरकदम्बवासिनि!' ख. पाठः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

* क्यजन्तात् तुमुनीदं रूपम् ।

बहिरङ्कणमासादयति तथा त्वया रक्षितव्ये'ति । तदवहितो देवीनिदेशमनुतिष्ठामि ।

[ततः प्रविशति कुवलयावली चन्द्रलेखा च ।]

चन्द्रलेखा — (क) हळा! मुद्दिआविरहेण अकअपंचाळिआभमं तुमं एसो ण आणादि । ता एहि णिक्कंपाओ विळासुज्जाणं गच्छामो ।

कञ्चुकी — [सपाणिपरिवेषं विलोक्य] भोः! कयोरयं पदशब्दः ।

चन्द्रलेखा — (ख) अय्य! चंदळेहा खु अहं । इअं उण इंदीवराळीणामआ अण्णा संचारिआ किं वि रहस्सं कहऊण भट्टिणीए पेसिदा । ता एदं भट्टिणो संमुहं वाचेमि । तुमं कुवळआवळीए घरद्दुवारं ओहिदो रक्खेहि ।

कञ्चुकी — भद्रे! गम्यतां सिद्ध्ये शीघ्रमागम्यतां च । अहमवहितो भवामि । [इति निष्क्रान्तः]

चन्द्रलेखा — (ग) हळा! वंचिदो खु एसो ठविरसोविदळ्ळो ।

क. हला! मुद्रिकाविरहेणाकृतपाञ्चालिकाभ्रमां त्वामेष न जानाति । तदेहि निष्कम्पे विलासोद्यानं गच्छावः ।

ख. आर्य! चन्द्रलेखा खल्वहम् । इयं पुनरिन्दीवरालीनामिकान्या सञ्चारिका किमपि रहस्यं कथयित्वा भट्टिन्या प्रेषिता । तदेतत् भर्तुः सम्मुखं वाचयामि । त्वं कुवलयावल्या गृहद्वारमवहितो रक्ष ।

ग. हला! वञ्चितः खल्वेष स्थविरसौविदल्लः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कुवलयावली—[आत्मगतम्] (क) ण आणे कहं एसो अणुसओ (अद्धिवो ?) वंचिदव्वो त्ति । [प्रकाशम्] हळा किअद्दूरे कदळिआघरं ।

चन्द्रलेखा—(ख) इदं खु । पविसदु पिअसही । दिग्घिआए तरंगसीअरपरिब्भीअसीअळे चंदसिळाअळे उपविसामो ।

[उभे तथाकुरुतः ।]

कुवलयावली—(ग) हळा ! बळिअं खु संदाववंति मह अंगाइ ।

चन्द्रलेखा—(घ) सहि ! [1]सुहणिमित्तं । इह एव्व पच्छाअसीअळे तुज्झ संदावो समिस्सदि ।

[ततः प्रविशति नायकः ।]

नायकः—[मदनावस्थां नाटयन्] कथमभिसन्धीयते पटुधियापि मया धृतेरभिसन्धिपरिपन्थी मन्मथः ।

क. न जाने कथमेषोऽनुशयो वञ्चयितव्य इति । हला ! कियद्दूरे कदलिकागृहम् ।

ख. इदं खलु । प्रविशतु प्रियसखी । दीर्घिकायास्तरङ्गशीकरपरिभ्रमशीतले चन्द्रशिलातले उपविशावः ।

ग. हला ! बलवत् खलु सन्तापवन्ति ममाङ्गानि ।

घ. सखि ! शुभनिमित्तम् । इहैव प्रच्छायशीतले तव सन्तापः शमिष्यति ।

---

१. 'सुखणिमित्तं' ख. पाठः.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

जयतितरां रतिजानेरनुभावो निखिलधीरपरिभावी ।
[1]यदसज्जितापि रणन्ती बाणानन्विष्य शिञ्जिनी भ्रमति ॥ ३ ॥

[साशंसनम्]

उत्फुल्लगण्डयुगमुद्गतमन्दहास-
मुद्वेलरागमुररीकृतकामतन्त्रम् ।
हस्तेन हस्तमवलम्ब्य कदानु सेवे
सल्लापरूपममृतं सरसीरुहाक्ष्याः ॥ ४ ॥

कथं चिरायति श्रीवत्सः ।

[प्रविश्य विदूषकः ।]

विदूषकः—[सहर्षम्] (क) अज्ज जोगमायामहूसवावदेसेण सअळो वि णअरीसीमंतिणीजणो देवीहिं समं पट्ठाविदो । ता मह मंतप्पहावं पिअसहं णिवेदेमि । [परिक्रम्य] वड्ढदु पिअवअस्सो ।

नायकः—[साकूतस्मितम्] अपि सखे! फलितस्तव निधानसाधने मन्त्रप्रयोगः ।

विदूषकः—(ख) भो मंतबळेण णिक्कासिदे देवीपण्णईळोए सो णिहि केण वि दूसंदेसेण पिआएण दाणिं

क. अद्य योगमायामहोत्सवापदेशेन सकलोऽपि नगरीसीमन्तिनीजनो देवीभिः समं प्रस्थापितः । तन्मम मन्त्रप्रभावं प्रियसखं निवेदयामि । वर्धतां प्रियवयस्यः ।

ख. भोः! मन्त्रबलेन निष्कासिते देवीपन्नगीलोके स निधिः

---

१. 'यदसज्जितापि' ख. पाठः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

रक्खिज्जइ । उप्पिणी बह्हुमुहं कुवळआवळीरक्खणे णि-उज्जेइ ।

नायकः—सोऽयं सामदानाभ्यामभेदनीयो विश्वासी सौविदल्लः ।

श्रीवत्सः—(क) सो खु अहिआरी, तं वि सुणुअमुहेण सावराहं काऊण काराघरंमि किं णिवेसेमि ।

नायकः—शान्तं पापं शान्तं पापम् । धिङ् मूर्ख ! परमाप्तजने पापमाशङ्कसे ।

श्रीवत्सः—(ख) ता सो चिरं सुखी होदु ।

नायकः—इमामातपवेलां कदलिकागृहेऽतिवाह्य रज-नीमुखे समुचितमुपायमाचरामः ।

श्रीवत्सः—(ग) भो इदं उज्जाणं ।

[प्रवेशं नाटयतः ।]

राजा—

राजत्कोरककण्टका मधुकरीझङ्कारहुंकारिणी-
 रालोलस्तबकस्तनीरविरलानुत्नप्रवालाधराः ।

केनापि दुस्सन्दर्शन पिशाचेनेदानीं रक्ष्यते । रुक्मिणी बभ्रुमुखं कुवलयावली-रक्षणे नियोजयति ।

क. स खल्वभिचारी, तमपि शून्यमुखेन सापराधं कृत्वा कारागृहे किं निवेशयामि ।

ख. तत् स चिरं सुखी भवतु ।

ग. भोः ! इदमुद्यानम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

आलिङ्गन्ति लतावधूरतितरामानम्रशाखाकरै-
रत्यारूढरसा रसालरसिकाः कान्ते वसन्तोत्सवे ॥५॥

श्रीवत्सः— (क) भो! किं फळं वसंतप्पसंसाए । सव्वसमअपट्टबंधो पाउरसमओ पसंसीअदु ।

नायकः— कथय कथमेतावानुत्कर्षो वर्षाणाम् ।

श्रीवत्सः— (ख) जं तत्थ कण्णरसाअणणिमंतक्खरो णासिआरसाअणपाकगंधो जीहारसाअणपदत्थवित्थरो बम्हणाणं कप्परुक्खसरूवो होइ अपरपक्खो ।

नायकः— साधु कुक्षिम्भर! साधु ।

श्रीवत्सः— (ग) भो! पेच्छ सअळकरणग्गामहेअरं सोभग्गं सिंगारवणस्स ।

नायकः— [सार्धाङ्गीकारम्]

इतो भृङ्गीगीतं विहरणमितो मन्दमरुता-
मितो वल्लीलास्यं परिचितिरितः पुष्परजसाम् ।
अतो भूतं तृप्तैरितरकरणैर्हन्त रसना
पुनस्तस्या बिम्बाधरमधु विना शुष्यति मम ॥६॥

क. भोः! किं फलं वसन्तप्रशंसया । सर्वसमयपट्टबन्धः प्रावृट्समयः प्रशस्यताम् ।

ख. यत् तत्र कर्णरसायननिमन्त्राक्षरो नासिकारसायनपाकगन्धो जिह्वारसायनपदार्थविस्तरो ब्राह्मणानां कल्पवृक्षसरूपो भवत्यपरपक्षः ।

ग. भोः! पश्य सकलकरणग्रामहृद्यं सौभाग्यं शृङ्गारवनस्य ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीवत्सः— (क) भो इयं खु विआसिदारविंदसुंदरमअरंदणीसंदपरिसे(स ? अ)गरुअचक्कवाअउलपक्खविक्खेवकंपंतकुवळअवळआमोदमेदुरमंदमारुआ विळासुज्जाणदिग्घिआ।

नायकः— अत्र खलु।

रक्ताब्जसैकतावर्तरथाङ्गयुगलोत्पलैः।
स्थितमेकत्र तद्गात्रतुलाभ्रष्टाधिकारिभिः ॥ ७ ॥

कुवलयावली— (ख) हळा दहइ मे अंगेसु जरठादवेण संदावो।

चन्द्रलेखा—(ग) बहळदररसाळासप्पच्छाअसीअळे कुदो इमंमि पवेसो आदवस्स।

श्रीवत्सः— [आकर्ण्य निरूप्य] (घ) भो इअं खु चन्दलेहाद्दुदीआ कुवळआवळी।

नायकः— [सानुरागसम्भ्रमम्] सखे! श्रीवत्स!

कासौ दृशोरमृतवर्त्तिरतर्कणीया
कानन्दसिद्धिघुटिका निरुपाधिसिद्धा।

क. भोः इयं खलु विकसितारविन्दसुन्दरमकरन्दनिष्यन्दपरिषेकगुरुकचक्रवाककुलपक्षविक्षेपकम्पमानकुवलयवलयामोदमेदुरमन्दमारुता विलासोद्यानदीर्घिका।

ख. हला! दहति मेऽङ्गेषु जरठातपेन सन्तापः।

ग. बहलतररसालाशाप्रच्छायशीतले कुतोऽस्मिन् प्रवेश आतपस्य।

घ. भोः! इयं खलु चन्द्रलेखाद्वितीया कुवलयावली।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

क्वाकल्पनापरिणता नवकल्पवल्ली
क्वानक्षरा वसति मोहनमूलविद्या ॥ ८ ॥

श्रीवत्सः— (क) इदं खु कदलिआघरम्।

नायकः— [विलोक्य]

इयमनिलचलितकदलीदलेषु परिलक्षिता च पिहिता च।
उत्कण्ठयति मनो मे रतिरिव विश्लेषसंश्लेषैः॥ ९ ॥
सखे! प्रसङ्गमुपगम्य यथावसरमुपसरावः।

श्रीवत्सः— (ख) भो! भो! जाणे संगमादो वि पेम्मपरिक्खणं सुहअरं त्ति।

नायकः— सखे! परमानन्दसर्वस्वं सर्वमुदाहरसि।

अन्तर्हितो निगदितानि मनोरमायाः
शृण्वन् मुहूर्तमपि भावनिवेदनानि।
प्रायेण नन्दति यथा न तथा कृतात्मा
वर्षान् सहस्रमपि केवलमेलनेन ॥ १० ॥

[उभौ लतान्तर्हितौ तिष्ठतः]

श्रीवत्सः— (ग) भो! पेच्छ इमाए वेसेणेव्व संदावो सव्वक्खरं आचक्खीअदि।

क. इदं खलु कदलिकागृहम्।

ख. भो भो! जाने सङ्गमादपि प्रेमपरीक्षणं सुखकरमिति।

ग. भो! पश्यास्या वेषेणैव सन्तापः सर्वाक्षरमाख्यायते।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नायकः— सखे! सम्यगुपलक्षितं भवता ।

आकल्पैरतिसान्द्रचन्द्रघुटिकाप्रायैस्तनोस्तर्पणं
श्रीगन्धद्रवलेपनेन कुचयोरत्यन्तमालेपनम् ।
लीलातामरसोदरेण करयोरक्ष्णोश्च संवाहनं
प्रेयस्याः प्रकटीकरोति विषमां हा हन्त तापव्यथाम् ॥

कुवलयावली— (क) संदावकारणं कदलिआघरं संदावणिवारणं त्ति अळीअं मंतेसि ।

[चन्द्रलेखा नवकदलीदलैरेनां छादयन्ती वीजयति ।]

कुवलयावली— (ख) हळा! पुढमं कप्पूरेण धूविदं मअणाणळं दाणिं किंति कदळीदलाणिळेहिं पज्जळिअं करेसि ।

[इति तान्यपक्षिपति]

चन्द्रलेखा—[आत्मगतम्] (ग) हन्त मअणसंदावो समुद्दीविदो एदाए । [प्रकाशम्] (घ) हळा! अहीरा खु तुमं ।

कुवलयावली— (ङ) हळा! तस्स अह्माणं भट्टिणो दंसणादो पहुदि कुकूळग्गिमग्गं विअ समग्गवेअणं अप्पाणं धारेंतिं वि मं अहीरेत्ति कहं वाहरसि ।

क. सन्तापकारणं कदलिकागृहं सन्तापनिवारणमित्यलीकं मन्त्रयसि ।

ख. हला! प्रथमं कर्पूरेण धूपितं मदनानलमिदानीं किमिति कदलीदलानिलैः प्रज्वलितं करोषि ।

ग. हन्त! मदनसन्तापः समुद्दीपित एतस्याः । हला! अधीरा खलु त्वम् ।

घ. हला! अधीरा खलु त्वम् ।

ङ. हला! तस्यास्माकं भर्तुर्दर्शनात् प्रभृति कुकूलाग्निमग्नमिव समग्रवेदनमात्मानं धारयन्तीमपि मामधीरेति कथं व्याहरसि ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीवत्सः— (क) भो वअस्स ! किं सुदं एदं ।

नायकः— सखे ! शब्दग्राहिणा फलितमस्मत्करणेन ।

आकर्णितानि ननु कर्णरसायनानि
सख्याः पुरो निगदितान्यतिवत्सलायाः ।
एतानि तानि वचनानि मनोरमाया
भावानुबन्धपिशुनान्यपकैतवानि ॥ १२ ॥

चन्द्रलेखा— (ख) हळा ! तुह अणुमदिं विणा भट्टारअं आणेदुं आसंकेमि ।

कुवलयावली— [आत्मगतम्] (ग)

कळकंठो विसकंठो होदु पवाळो वि दिग्घकरवाळो ।
चंदो वि विसणिसंदो जुळंतदहणो पडीरगिरिपवणो
[॥ १३ ॥
रइवइणा कुविदेण वि मरणादो उवरि किं णु कादव्वं ।
पिअसहि ! सिलाहणिज्जं णहि णहि ळंघेमि कण्णआ-
[समअं ॥ १४ ॥

श्रीवत्सः— (घ) साहु मणस्सिणि ! साहु ।

क. भो वयस्य ! किं श्रुतमेतत् ।

ख. हला ! तवानुमतिं विना भट्टारकमानेतुमाशङ्के ।

ग. कलकण्ठो विषकण्ठो भवतु प्रवालोऽपि दीर्घकरवालः ।
चन्द्रोऽपि विषनिष्यन्दो ज्वलद्दहनः पाटीरगिरिपवनः ॥
रतिपतिना कुपितेनापि मरणादुपरि किन्नु कर्तव्यम् ।
प्रियसखि ! श्लाघनीयं नहि नहि लङ्घयामि कन्यकासमयम् ॥

घ. साधु मनस्विनि ! साधु ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चन्द्रलेखा— [आत्मगतम्] (क) आसासपसंगंतरेण एदं विह्मरिदवेअणं दाव करेमि। [प्रकाशम्] हळा! उह्णं उह्णेण संमइ त्ति भट्टिणो संदावेण तुह संदावो संमइ।

कुवलयावली— (ख) हळा! भट्टिणो संदावो त्ति अळीअपिअजम्पिदेण मं आसासेसि।

चन्द्रलेखा— (ग) हळा! सच्चं एदं। सवामि पिअसहीए।

कुवलयावली — (घ) [सहर्षगद्गदम्] हळा! तुह केण आचक्खिदं।

चन्द्रलेखा— (ङ) णं देवीहिं समं कादव्वस्स अवदीमहूसवगमणस्स अंतराएण तुह णिरूढराअस्स भट्टिणो-अदक्खिण्णेण।

श्रीवत्सः— [सहसोपसृत्य] (च) इमिणा अ पुडमं तह वणळुळाअमंसळेण दाणिं पिअवअस्सचिन्ताए एव्वं परिक्खीणेण सिरिवच्छेण बंह्मणेण।

क. आश्वासप्रसङ्गान्तरेणैतां विस्मृतवेदनां तावत् करोमि। हला! उष्णमुष्णेन शाम्यतीति भर्तुः सन्तापेन तव सन्तापः शाम्यति।

ख. हला! भर्तुः सन्ताप इत्यलीकप्रियजल्पितेन मामाश्वासयसि।

ग. हला! सत्यमेतत्। शपे प्रियसख्यै।

घ. हला! तव केनाख्यातम्।

ङ. ननु देवीभिः समं कर्तव्यस्य भगवतीमहोत्सवगमनस्यान्तरायेण तव निरूढरागस्य भर्तुरदाक्षिण्येन।

च. अनेन च प्रथमं तथा वनलुलायमांसलेनेदानीं प्रियवयस्यचिन्तयैवं परिक्षीणेन श्रीवत्सेन ब्राह्मणेन।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कुवलयावली — [ससाध्वसकम्पम्] (क) अह्मो माणुसीए भणइ वाणरो वाआए ।

चन्द्रलेखा — [जनान्तिकम्] (ख) हळा! मा एव्वं भण। भट्टिणो खु पिअवअस्सो एसो । [आत्मगतम्] भट्टा वि सण्णिहिदो भवे । होदु, एव्वं दाव । [प्रकाशम्] भो दुट्ठ-बंह्मण! ईरिसाइ अदक्खिणाइ उपदिसंदं तुमं देवीए सण्णिहिं णइस्सं । [इति शिखायां गृह्णाति।]

श्रीवत्सः — (ग) अविहा अविहा ।

नायकः — नूनं मदुपवरणायैव संविहितमेवं विदग्धया चन्द्रलेखया । [1]तदुपसर्पामि । सखे! न भेतव्यं न भेतव्यम् ।

चन्द्रलेखा — [श्रीवत्सं विसृज्य] (घ) जेउ जेउ भट्टा ।

(कुवलयावली सशृङ्गारसाध्वसम् उत्थातुं प्रयतते ।)

नायकः — [बलादेनां निवारयन्] नहि वयमिदानीमुपचरणीयाः । किन्त्वस्माभिरेव,

---

क. अहो! मानुष्या भणति वानरो वाचा ।

ख. हला! मैवं भण । भर्तुः खलु प्रियवयस्य एषः । भर्तापि सन्निहितो भवेत् । भवतु, एवं तावत्, भोः! दुष्टब्राह्मण! ईदृशान्यदाक्षिण्यान्युपदिशन्तं त्वां देव्याः सन्निधिं नेष्यामि ।

ग. अविहा अविहा ।

घ. जयतु जयतु भर्ता ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

१. 'सत्वरमुपसर्पामि' क. पाठः.

अभिनवबिसकाण्डपेलवं
तदनु पयोधरभारभङ्गुरम् ।
तदुपरि परितापनिस्सहं
परिचरणीयमिदं तवाङ्कम् ॥ १५ ॥

चन्द्रलेखा — (क) अकिदासणपरिग्गहे भट्टारअंमि कहं पिअसही उववसदि । ता सिणिद्धसीअळसिळेक्कदेसं णं अळंकरेदु महाराओ ।

नायकः — यदभिरुचितं प्रियवयस्यायै । [इत्युपविशति]

[कुवलयावली साङ्गसङ्कोचा सखीं सासूयमवलोकयन्ती पुनरुत्तिष्ठति ।]

नायकः — [वासुत्तरीये निगृह्य]

करभोरु ! विपुलजघने !
तनुमध्ये ! निम्ननाभि ! निबिडकुचे ! ।
कलकण्ठि ! कमलवदने !
चकितचकोराक्षि ! किं प्रयासेन ॥ १६ ॥

[इति पुनरपि निवेशयति]

श्रीवत्सः — [स्वगतम्] (ख) हन्त पक्खवाअउत्तिणो रण्णो सण्णिहाणे ठाउं ण जोग्गं । जेण सिट्ठबंह्मणेक्कविद्देसिणी दुट्ठदासिआ पिअसहित्ति संभाविज्जइ । किंअ ताए एव्व उवदेसो अणुचिट्ठीअदि । [इति ससम्भ्रम(मु ? म)पसरति ।]

क. अकृतासनपरिग्रहे भट्टारके कथं प्रियसख्युपविशति । तद् स्निग्धशीतलशिलैकदेशं नन्वलङ्करोतु महाराजः ।

ख. हन्त ! पक्षपातवर्तिनो राज्ञः सन्निधाने स्थातुं न योग्यम् । येन शिष्टब्राह्मणैकविद्वेषिणी दुष्टदासिका प्रियसखीति सम्भाव्यते । किञ्च तस्या एवोपदेश अनुष्ठीयते ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चन्द्रलेखा—(क) तदभिप्पआहि भो सिट्ठबह्मण ! मे अक्कमेसु अविणअक्कमेसु । [इत्यनुसरति] ।

श्रीवत्सः—(ख) हंडे ! रच्छारदे ! एहिएहि । देवीए सच्चभामाए एव्व संमु(हिं ? हं) आलेक्खामि । [इति शिखां मुहुर्निबध्नन् निष्क्रान्तः]

चन्द्रलेखा—(ग) अय्य ! सिरिवच्छ ! पसीदेत्ति । [तमनु निर्गच्छति ।]

कुवलयावली—(घ) हला ! तुमं वि किं मं परिच्चअसि । [इत्यनुयातुमुत्तिष्ठति ।]

नायकः—प्रिये कुवलयावलि !

दत्तासि घर्मकणिकाजलधारया मे
　　कामेन लोकगुरुणा करुणाकरेण ।
पश्यावयोरपि परस्परागबन्धे
　　रागाग्निरेव भगवानयमादिसाक्षी ॥ १७ ॥

इति चिबुके मुखमुन्नमयति ।

कुवलयावली—[मुखमाकृष्य] (ङ) भो ! मा तुमं लघूकरेहि जणेसु ।

क. तदभिप्रयाहि भो शिष्टब्राह्मण ! मेऽक्रमेष्वविनयक्रमेषु ।

ख. हण्डे ! रथ्यारते ! एह्येहि । देव्याः सत्यभामाया एव सम्मुखमालक्षयामि ।

ग. आर्य ! श्रीवत्स ! प्रसीदेति ।

घ. हला ! त्वमपि किं मां परित्यजसि ।

ङ. भो ! मा त्वं लघूकुरुष्व जनेषु ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

[ततः प्रविशति सत्यभामा चतुरिका च ।]

सत्यभामा — [ससौभाग्यगर्वम्] (क) हळा ! चउरिए !
परिअरबळेण जं जं अळं जुजं तं (त)दण्णवेसादो।
(णववेसा) सुरअंता होंति (हि) रुइअसुरआरंभा(?) ॥१८॥

चतुरिका — (ख) भट्टिणि! ण खु सव्वापि इत्थिआ सच्चभामा ण खु सव्वो वि पुरुसो पुरुसोत्तमो ।

सत्यभामा — [सादरस्मितम्] (ग) हळा ! कदळिआघरसमीवम्मि अय्यउत्तो दिट्ठो त्ति कए आचक्खिदं ।

चतुरिका — (घ) भट्टिणि! विळासुज्जाणपाळिआए कळकंठिआए ।

सत्यभामा — (ङ) हळा! अविण्णादा पसंगंतरेण पविट्ठा अळीअरोसच्छळेण भट्टिणा केळिस्सं ।

चतुरिका — (च) इदं खु विळासुज्जाणं ।

[उभे प्रविशतः ।]

क. हला! चतुरिके!
परिकरबलेन यद्यदलं युतं तत् तदन्यवेषात् ।
(नववेषाः) सुरतान्ता भवन्ति (हि) रुचितसुरतारम्भाः (?) ॥

ख. भट्टिनि! न खलु सर्वापि स्त्री सत्यभामा, सर्वोऽपि पुरुषः पुरुषोत्तमः ।

ग. हला! कदलिकागृहसमीपं आर्यपुत्रो दृष्ट इति कयाख्यातम् ।

घ. भट्टिनि! विलासोद्यानपालिकया कलकण्ठिकया ।

ङ. हला! अविज्ञाता प्रसङ्गान्तरेण प्रविष्टालीकरोषच्छलेन भर्त्रा क्रीडिष्यामि ।

च. इदं खलु विलासोद्यानम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चतुरिका — (क) भट्टिणि! पेच्छसो अज्जस्स कए उ वळंमि तुह पदक्कमणे भट्टारआवराहे केसळकण्णुप्पळेण रइदा सिक्खा ।

सत्यभामा — [सस्मितम्] (ख). ता अपुरुवं खु कदळिआघरं ।

चतुरिका — (ग) अअं खु भट्टिणो. समाळावो सुणीअदि ।

सत्यभामा — (घ) ता अणाळक्खिदा आअण्णेमि पसंगं । [तथा कृत्वा, उभे कुवलयावलीं विलोकयतः ।]

चतुरिका — (ङ) भट्टिणि! किं वि एत्थ अण्णव्व वट्टदि ।

सत्यभामा — (च) हळा! अविस्ससणिज्जो खु एसो

नायकः — [सानुनयम्]

विटपवती किसलयिनी मञ्जरिता तन्वि! तनुलता सेयम्।
फलमिदमाकटाक्षं तत्(?) मामनुजानीहि किं विलम्बेन
[॥ १९ ॥

[इति मुखमुन्नमयति ।]

क. भट्टिनि! प्रेयस आर्यस्य कृते तु बलात् तव पदक्रमणे भट्टारकापराधे केसरकर्णोत्पलेन रचिता शिक्षा ।

ख. तदपूर्वं खलु कदलिकागृहम् ।

ग. अयं खलु भर्तुः समालापः श्रूयते ।

घ. तदनालक्षिताकर्णयामि प्रसङ्गम् ।

ङ. भट्टिनि! किमप्यत्रान्यदिव वर्तते ।

च. हला! अविश्वसनीयः खल्वेषः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कुवलयावली — (क) भो ! मुंच अविणअं रक्खेहि ।

सत्यभामा — [सहसोपसृत्य] (ख) भो दारिए ! कण्ण-आकामुअस्स इमस्स महाराअस्स अणुणअं काऊण तुमं विणअं रक्खेहि ।

नायकः — [साशङ्कं नायिकां विसृजति ।]

कुवलयावली — [सभयमपसरन्ती लतान्तरिता दिशोऽवलोकयति ।]

[प्रविश्य]

चन्द्रलेखा — [सखीमालिङ्ग्य] (ग) किंत्ति तुह तणु-लदा वेवइ ।

कुवलयावली — [कथञ्चिद् प्रकृतिमुपगम्य] (घ) हळा ! सच्चभामाए दिट्ठचावळह्मि ।

चन्द्रलेखा — [सशङ्कम्] (ङ) कुदो खु इअं आगदा अणब्भवज्जविट्ठी । ता एहि अब्भन्तरं गच्छामो । [इति सखीं हस्ते गृहीत्वा निष्क्रान्ता ।]

नायकः — [साञ्जलिपुटम्]

आगो नास्तीति वचो बाधितमस्तीति दासतानुचितम् ।
पापीति सिद्धसाधनमधुना देवी प्रमाणमौचित्ये ॥ २० ॥

क. भो ! मुञ्चाविनयं रक्ष ।

ख. भो दारिके ! कन्यकाकामुकस्यास्य महाराजस्यानुनयं कृत्वा त्वं विनयं रक्ष ।

ग. किमिति तव तनुलता वेपते ।

घ. हला ! सत्यभामया दृष्टचापलास्मि ।

ङ. कुतः खल्वियमागतानभ्रवज्रवृष्टिः । तदेह्यभ्यन्तरं गच्छावः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सत्यभामा — (क) महाराअस्स ओसरं अजाणिअ विस्संभभंगकारिणी अहं अ उइदकम्मं ण जाणामि ।

नायकः — [आत्मगतम्] हन्त श्रीवत्सोऽपि नात्र सन्निहितः ।

[प्रविश्य]

श्रीवत्सः — [सनिर्वेदम्] (ख) अह्मो मंदबुद्धिणो विह्मरणसीळत्तणं मज्झ । जं णतक्कि(?)किसळअत्तिदहदएण देट्ठग्गुळिअवेअणा सच्चभामा जोगमाआमहूसवस्स ण गदे त्ति णो (णि)वेदिदं पिअसहस्स । सो वि मत्तो कण्णआविस्संभं करेइ । अहं गदुअ अप्पमोदं उवदिसामि । [परिक्रम्य, सत्यभामां विलोक्य सशङ्कम्] अह्मो विस्संभविग्घकारिणी सा पुडमं एव्व एत्थ सण्णिहिदा । ता इदो एव्व शणै चिट्ठामि ।

नायकः — [सत्यभामां हस्ते गृहीत्वा]

सापराधे च दण्ड्ये च पुरतो मयि तिष्ठति ।
प्रभवन्त्यपि किं रोषं विधत्से धीरमानसे ! ॥ २१ ॥

क. महाराजस्यावसरमज्ञात्वा विस्रम्भभङ्गकारिण्यहं चोचितकर्म न जानामि ।

ख. अहो मन्दबुद्धेर्विस्मरणशीलत्वं मम । यद् .... किसलयस्थितहतकेन दष्टाङ्गुलिकवेदना सत्यभामा योगमायामहोत्सवस्य न गतेति नो निवेदितं प्रियसखस्य । सोऽपि मत्तः कन्यकाविस्रम्भं करोति । अहं गत्वाप्रमोदमुपदिशामि । अहो विस्रम्भविघ्नकारिणी सा प्रथममेवात्र सन्निहिता । तदित एव शनैस्तिष्ठामि ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथवा श्रूयताम् —

बद्धे भ्रूयुगले विभङ्गकुटिलं बद्धोऽस्मि वेगोत्थितै-
[1]र्निःश्वासैरभिताडितेऽधरपुटे सन्ताडितोऽस्मि प्रिये ! ।
कल्हारेऽरुणया दृशा श्रुतिसखे रुद्धे निरुद्धोऽस्मि मां
जानीथास्तव दण्डितं परुषया सख्येव कोपश्रिया ॥ २२ ॥

[इति पादयोः पतितुमिच्छति ।]

सत्यभामा — [हस्तमाकृष्य सपरिजना निष्क्रान्ता ।]

नायकः — [सदैन्यनिःश्वासम्] नियतौ प्रातिकूलायां किन्नु पौरुषेण । तथाहि—

नास्वादितं तदधरामृतमन्तिकस्थं
देव्याः कृतो मनसि विप्रियवज्रलेपः ।
सेयं सपत्नजनहस्तगता च मुग्धा
कष्टं पुरः स्फुरति कल्मषकर्मपाकः ॥ २३ ॥

श्रीवत्सः — [शनैः शनैरुच्चि...न्नुपसृत्य] (क) भो वअस्स ! जम्मणक्खत्तोपसग्गादो विमुक्क ह्म ।

नायकः — सखे ! महोत्सवप्रतिनिवृत्ता देवी प्रसङ्गमिममाकर्ण्य कियत् पीडयिष्यति तव प्रियसखीमिति पर्याकुलोऽस्मि ।

क. भो वयस्य ! जन्मनक्षत्रोपसर्गाद् विमुक्ताः स्मः ।

---

१. 'निःश्वासैरपि ताडिते' क. पाठः.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीवत्सः — (क) भो वअस्स ! भवंतं भाविणं अ(णं ? णु) भवं(तेण) एव्व परिहरणिज्जेत्ति णिवेदे(दि ? मि) णो अण्णो त्ति । ता एहि सच्चभामं अणुस(रामि ? रह्म) ।

नायकः — एवमेव करणीयमिदानीम् ।

श्रीवत्सः — (ख) इदो इदो पिअवअस्सो ।

नायकः — [सस्मरणम् आकाशे लक्ष्यं बद्ध्वा] अयि ! प्रिये ! कुवलयावलि ! तथा खलु

कण्टककलिकान्वितया
तरलितया तव लताङ्गि ! तनुलतया ।
निष्कण्टकमिव मन्ये
मम राज्यं भागधेयानाम् ॥ २४ ॥

[इति सवयस्यो निष्क्रान्तः ।]

तृतीयोऽङ्कः ॥

क. भो वयस्य ! भवन्तं भाविनमनुभवतैव परिहरणीयेति निवेदयामि नान्यदिति । तदेहि सत्यभामामनुसरावः ।

ख. इत इतः प्रियवयस्यः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ चतुर्थोऽङ्कः ।

[ततः प्रविशति परिचारिकाद्वयम्]

एका — (क) हळा! कत्थूरिए! देवी जोगमाआमहूसवादो जदो पडिणिवुत्ता तदो पहुदि अकारणं वि परिअणं(?) कुप्पइ, किं काळणम् ।

कस्तूरिका — (ख) हळा घणसारिए! णं चदुरिआमुहादो देवीए पडिण्णाविदो कदळीघरंमि भट्टिणो वुत्तंतो ।

घनसारिका — (ग) जुज्जइ । अह कुवळआवळीए को वुत्तंतो ।

कस्तूरिका — (घ) सा खु महेसिणा पुणो वि तवोवणं णीदेत्ति पवादं कदुअ अह्मारिसजणस्स दुग्गमंमि सत्तच्छदपासाअसुरंगाघरअंमि ठाविदा कुळक्कमागदेण विस्सासिणा माहवउळपरिअणेण सह्यो रक्खिज्जइ ।

क. हला! कस्तूरिके! देवी योगमायामहोत्सवाद् यतः प्रतिनिवृत्ता ततः प्रभृत्यकारणमपि परिजनाय कुप्यति, किं कारणम् ।

ख. हला! घनसारिके! ननु चतुरिकामुखाद् देव्यै प्रतिज्ञापितः कदलीगृहे भर्तुर्वृत्तान्तः ।

ग. युज्यते । अथ कुवलयावल्याः को वृत्तान्तः ।

घ. सा खलु महर्षिणा पुनरपि तपोवनं नीतेति प्रवादं कृत्वास्मादृशजनस्य दुर्गमे सप्तच्छदप्रासादसुरङ्गागृहे स्थापिता कुलक्रमागतेन विश्वासिना माधवकुलपरिजनेन सद्यो रक्ष्यते ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

घनसारिका—(क) पुरा खु एव्वंसीळा ण होइ देवी । दाणिं खु सच्चभामाए उवदेसेण दीहकोवणा अदिस्ससीला अ सव्वुत्ता । तह गुणदोसा अ संसग्गदो संकमंति त्ति ।

कस्तूरिका—(ख) हळा ! महादेविं रुक्खिणिं ळोअमहिळासामण्णं मण्णिअ किं एव्वं भणासि ।

घनसारिका—(ग) हळा! सअळमहिळासिळाहणिज्जस्स बंधुजणविसज्जिदस्स दाक्खिण्णणिहिणो तारिसस्स कण्णआरअणस्स ईरिसं णिरोहं करेइ त्ति उम्मणाअमाणा एव्वं भणामि ।

कस्तूरिका—(घ) किं तुमं ण आणासि कुवळआवळीए उवरि देवी एव्व णिव्विसेसं सिणेहं करेइ । किंतु दाणिं सवत्तिआजणदक्खिणं दुवारिकरिअ तस्स पडिण्णासआ-

---

क. पुरा खल्वेवंशीला न भवति देवी । इदानीं खलु सत्यभामाया उपदेशेन दीर्घकोपनादृश्यशीला च संवृत्ता । तथा गुणदोषाश्च संसर्गतः सङ्क्रामन्तीति ।

ख. हला! महादेवीं रुक्मिणीं लोकमहिलासामान्यं मत्वा किमेवं भणसि ।

ग. हला! सकलमहिलाश्लाघनीयस्य बन्धुजनविसर्जितस्य दाक्षिण्यनिधेस्तादृशस्य कन्यकारत्नस्येदृशं निरोधं करोतीत्युन्मनायमानैवं भणामि ।

घ. किं त्वं न जानासि कुवलयावल्या उपरि देव्येव निर्विशेषं स्नेहं करोति । किन्त्विदानीं सपत्नीजनदाक्षिण्यं द्वारीकृत्य तस्य प्रतिन्यास-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

रिणो महेसिणो सा वि सज्झसेण तं कण्णअं अदिप्पआसेण ढक्केइ ।

घनसारिका—(क) हळा! जइ महेसी अणुमण्णेइ ता कुवळआवळीए मणोरहो फळिस्सदि त्ति णं तुमं जाणासि ।

कस्तूरिका—(ख) को एत्थ संसओ ।

घनसारिका — [सानुकम्पम्] (ग) सा दक्खिण्णणिही दुक्खसीळा णिव्वुदा होदु ।

कस्तूरिका— (घ) तुए सुदं भट्टिणो को णु वुत्तंतो त्ति ।

घनसारिका—(ङ) हळा जहा बब्हुमुहादो आअण्णिदं तह णिवेदेमि । [संस्कृतमाश्रित्य]

आस्ते पीठे क्षणमिव बहिर्मन्त्रिवृद्धानुरोधाद्
धत्ते हेलां परिजनवचोविक्रियासु क्रियासु ।
नेच्छत्यन्तःपुरपरिचयं राजकार्यापदेशात्
तस्याः प्रेम्णा तरळितधृतिश्चक्रवर्ती यदूनाम् ॥ १ ॥

कारिणो महर्षेः सापि साध्वसेन तां कन्यकामतिप्रयासेन छादयति ।

क. हला! यदि महर्षिरनुमन्यते तर्हि कुवलयावल्या मनोरथः फलिष्यतीति ननु त्वं जानासि ।

ख. कोऽत्र संशयः ।

ग. सा दाक्षिण्यनिधिर्दुःखशीला निर्वृता भवतु ।

घ. त्वया श्रुतं भर्तुः को नु वृत्तान्त इति ।

ङ. हला! यथा बभ्रुमुखादाकर्णितं तथा निवेदयामि ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कस्तूरिका — [हस्तमुरसि कृत्वा] (क) अहो बळिअं खु पेम्मबंधो भट्टारअस्स ।

* [विलोक्य] (ख) हळा! एसो खु अंतेउरपरिअणो इदो तदो णिळीअ णिक्कंपो होइ । ता देविं उवच्छंदेदुं आअदो भट्टेत्ति आसंकेमि ।

कस्तूरिका — (ग) ता एहि देवीसमीवं गच्छामो ।

[इति निष्क्रान्ते ।]

[प्रवेशकः ।]

[ततः प्रविशति नायको विदूषकश्च ।]

नायकः — [सानुरागनिर्वेदम् ।]

अद्य श्वो भविता समागम इति प्रेमोत्तरं ताम्यतो-
रत्यन्ते विजने कुतश्चन मुहुर्विश्लिष्यतोर्विघ्नतः ।
वैक्लब्यं वहतोः सुहृज्जनसमाश्वासैकजीवाशयो-
र्यूनोर्नूनमियं मनोरथमयी माया महायासिका ॥ २ ॥

श्रीवत्सः — (घ) भो वअस्स कत्थूरिआए णासे वि णाहिचम्म ण मुंचेसि । जं णारएण णीदाए कुवळआवळीए तुह चित्तस्य उक्कंठभरो तारिसो एव्व ।

क. अहो बलवान् खलु प्रेमबन्धो भट्टारकस्य ।

ख. हला! एष खल्वन्तःपुरपरिजन इतस्ततो निलीय निष्कम्पो भवति । तद् देवीमुपच्छन्दयितुमागतो भर्तेत्याशङ्के ।

ग. तदेहि देवीसमीपं गच्छावः ।

घ. भो वयस्य! कस्तूरिकाया नाशेऽपि नाभिचर्म न मुञ्चसि । यद् नारदेन नीतायां कुवलयावल्यां तव चित्तस्योत्कण्ठाभरस्तादृश एव ।

---

* इदं चन्द्रिकाया वचनं प्रतिभाति ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नायकः—[अश्रुतिमभिनीय]

सलीले धम्मिल्ले दरदलितकल्हारकलिकां
कपोले सोत्कम्पं मृगमदमयीं पत्रलतिकाम्।
कुचाभोगे कुर्वन् ललितमकरीं कुङ्कुममयीं
कदा नु क्रीडेयं चकितहरिणीचञ्चलदृशा ॥ ३ ॥

श्रीवत्सः—(क) भो वअस्स! अज्ज एव्व खु सो तावसदुद्दुरूटो तं कण्णअं घेत्तूण तपोवणं पविट्ठो। ता एहि सिग्घजवमहाजंघवाहेण रहेण तं अणुसरामो।

नायकः—[सनिःश्वासम्] किमनुसृत्य करणीयमस्माभिः।

श्रीवत्सः—[ससंरम्भम्] (ख) अहं तेण दंडादंडि बाहाबाहवि अ जुज्झस्सं। बह्मणभीरुओ तुमं तं कण्णअं जअसिरिं विअ संदणे ठाविऊण दुवारवदिं आअच्छेहि।

नायकः—सखे! नूनमिहागतो भ(ग)वान् मामदृष्ट्वाभिवर्तते इति तदिदं प्रवादमात्रमेवेति तर्कयामि।

श्रीवत्सः—(ग) णणु देवीए वसं गदाणं सव्वं वि विदिदं होदि।

[इत्युभौ परिक्रामतः।]

[नेपथ्ये कलकलः।]

क. भो वयस्य! अद्यैव खलु स तापसदुर्दुरूटस्तां कन्यकां गृहीत्वा तपोवनं प्रविष्टः। तदेहि शीघ्रजवमहाजङ्घवाहेन रथेन तमनुसरावः।

ख. अहं तेन दण्डादण्डि बाहूबाहवि च योत्स्ये। ब्राह्मणभीरुस्त्वं तां कन्यकां जयश्रियमिव स्यन्दने स्थापयित्वा द्वारवतीमागच्छ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ग. ननु देव्या वशं गतानां सर्वमपि विदितं भवति।

श्रीवत्सः— (क) भो तुवरेहि तुवरेहि । जं णारअसिस्सवग्गो तुमं अक्कंदइ, तदो तं बह्मणं घाइऊण को वि रक्खसो कुवळआवळिं अवहरिस्सदि त्ति तक्केमि ।

नायकः— विह्वलो भयपरिभ्रान्तबुद्धिरालपस्यसम्बद्धम् । ननु सप्तच्छदप्रासादपरिसरे खल्वयं परिजनस्याक्रन्दः । तदेहि किन्निमित्त इत्यवबोधयामः ।

[ततः प्रविशति परिभ्रान्तपरिजना विषण्णा रुक्मिणी]

रुक्मिणी— [सनिर्वेदम्] (ख) हळा सुगंधिए ! अप्पणो उवेक्खादो साधुबंदीकआए कुवळआवळीए हंत रुक्मिणी परि(णअ ? अण)घादिणी णिस्संसअत्ति ळोअवादे णिमग्गंमि । ता कळंकपंकिळेण किं अप्पणो ज़ीविदेण । विण्णवेहि अप्पणो ववसाअं अय्यउत्तस्स ।

सुगन्धिका— (ग) भट्टिणि! अक्खत्तिएव्व किं अहीरा होसि । जं गरुआणुराअणिच्चळेहिं ळोअणेहिं पुळोअन्तं भट्टारअं इदो आअच्छंतं ण पेच्छसि ।

क. भो त्वरस्व त्वरस्व । यन्नारदशिष्यवर्गस्त्वामाक्रन्दति, ततस्तं ब्राह्मणं हत्वा कोऽपि राक्षसः कुवलयावलीमपहरिष्यतीति तर्कयामि ।

ख. हला सुगन्धिके ! आत्मन उपेक्षातः साधुवन्दीकृतया कुवलयावल्या हन्त रुक्मिणी परिजनघातिनी निस्संशयमिति लोकवादे निमग्नास्मि । तत् कलङ्कपङ्किलेन किमात्मनो जीवितेन । विज्ञापयात्मनो व्यवसायमार्यपुत्रस्य ।

ग. भट्टिनि! अक्षत्रियेव किमधीरा भवसि । यद् गुरुकानुरागनिश्चलाभ्यां लोचनाभ्यां पश्यन्तं भट्टारकमित आगच्छन्तं न पश्यसि ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

रुक्मिणी—[विलोक्य सगद्गदम्] (क) अय्यउत्त! परित्ताएहि परित्ताएहि।

नायकः—[सादरमुपसृत्य] अयि विदर्भराजनन्दने! महादेवि!

मयि त्रातरि पातालभूतलस्वर्गवासिनाम्।
तवाज्ञाकरतां प्राप्ते कुतस्ते भीतिरागता॥ ४॥

[रुक्मिणी व्याहर्तुमिच्छति। व्रीडावैलक्षण्यमभिनीय सखीमवलोकयति।]

सुगन्धिका—(ख) भट्टारअ! सत्तच्छदप्पासादअळिंदे कुवळआवळी केण वि अणाळेक्खिदेण गेहिदेत्ति वाउळा देवी।

नायकः—भो प्रिये! किमेतावतापि परिभ्रान्तासि। सेयं कन्यका तव समीप इति चेतासि समाधीयतामाश्वासः।

[नेपथ्ये]

भो भो द्वारवतीवासिभिर्वीरम्मन्यैः पुरुषपलालैः श्रूयतामयं कालयवनसोदरस्य मे वीरस्यालापः—

अम्भोजिनीमिव मदावलदन्तलग्नां
मद्बाहुपञ्जरगतां मदिरायताक्षीम्।
यस्त्रातुमिच्छति मदेन यदोः प्रसूतौ
सोऽयं समेतु यदि वा सकलाः समेताः॥ ५॥

नायकः—अहो गर्वग्रन्थिबन्धुरं वचनमनात्मवेदिनः कालपाशवशवर्तिनो दानवस्य।

क. आर्यपुत्र! परित्रायस्व परित्रायस्व।

ख. भट्टारक! सप्तच्छदप्रासादालिन्दे कुवलयावली केनाप्यनालक्षितेन गृहीतेति व्याकुला देवी।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीवत्सः—(क) भो पिअवअस्सस्स देवीसंरक्खणे-अहं सज्जिदो होमि। तुमं माआविरक्खसं अप्पमत्तो वावादेहि ।

रुक्मिणी — (ख) हळा! गच्छ तुमं अय्यसच्चव(माहा ? म्मा)णं णिवेदेदुं अय्यउत्तस्य ववसाअं ।

नायकः— अयि प्रिये! किं न वीरसमरसमयज्ञासि । यदेकाकिनि विरोधिनि यदुवीरसन्नाहमादिशासि । पश्य

सिद्धार्थखण्डनविधौ कति वज्रधारा
योऽग्या भवन्ति परिकूटितशैलकूटाः ।
चण्डाः पतन्ति कति वा करिकुम्भकूट-
पाटच्चरा हरिपतेर्मशके चपेटाः ॥ ६ ॥

[इति ससंरम्भं परिक्रामन् सुदर्शनानुध्यानपरिग्रहणप्रयोगानभिनीय साशङ्कमवलोकयन्]

चक्रं विलोक्य चटुलाशनिघोरधारं
खड्गं दधाति सहखेटमसौ निशाटः ।

[सशङ्काविषादम्]

अस्यांसतो विकटवल्लवने सिताङ्गी
हा हन्त हन्त पततीयमराळकेशी ॥ ७ ॥

क. भो प्रियवयस्यस्य देवीसंरक्षणेऽहं सज्जो भवामि । त्वं मायाविराक्षसमप्रमत्तो व्यापादय ।

ख. हला! गच्छ त्वमार्यसत्यवर्माणं निवेदयितुमार्यपुत्रस्य व्यवसायम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तदेनां गगनभाग एव समालम्ब्य विह्वलां तरळ-तनुतरतरङ्गशीकरशिशिरगन्धवाहे विलासवनदीर्घिकातटे म-न्दमवतारयामि । [इति निष्क्रान्तः ।]

रुक्मिणी — (क) अय्य! सिरिवच्छ! माआविणो दाणवा। एआई गदो अय्यउत्तो। ण आणामि किण्णु सोदव्वं त्ति ।

श्रीवत्सः — (ख) देवि! सोहणं एव्व सुणीअदि ।

[प्रविश्य नारदः]

नारदः — [सहर्षम्]

आद्यापरोदयमुपोषितयोर्ममाक्ष्णो-
रस्मिन् महीमवतरत्यधुना मुकुन्दे ।
आश्चर्यदायिरणदश्च न पारणानां
प्राप्तैरजीर्णिरजनिष्ट जनिष्यते च ॥ ८ ॥

[विलोक्य] इमामेव पुरस्कृत्य शेषं सम्पादयामि । [उपसृत्य] महादेवि! वर्धसे पत्युर्विजयेन । श्रूयताम् —

सुराः सप्ताब्धिपूराभं य(दै?मै)क्षन्त महोदरम् ।
चक्रधाराग्निना सर्पिर्बिन्दुशोषं स शोषितः ॥ ९ ॥

रुक्मिणी — [ससम्भ्रमहर्षं नारदस्य पादयोः प्रणम्य] (ग) भअवदो पसादेण उज्जीविदह्मि ।

क. आर्य!, श्रीवत्स! मायाविनो दानवाः। एकाकी गत आर्य-पुत्रः। न जानामि किन्नु श्रोतव्यमिति ।

ख. देवि! शोभनम् एव श्रूयते ।

ग. भगवतः प्रसादेनोज्जीवितास्मि ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीवत्सः — [स्वोत्तरीयं वीजयन्] (क) ही ही णिज्जिदं पिअवअस्सेण । फळिदं अह्माणं भाअहेएण [इति नर्तित्वा सविनयम्] भअवं ! सिरिवच्छो सअण्णपंसं दुवे वारे तुज्झ सिरिचरणे अहिवादेइ ।

नारदः — [सस्मितम्] एवमेव मुदितो भूयाः ।

रुक्मिणी — (ख) भअवं किं अक्खदसरीरा वा मे वच्छा कुवळआवळी ।

नारदः — देवि ! यस्यामेवं तवादरो निसर्गसिद्धस्तस्याः किमुच्यते कुशलसम्पत्तिः ।

रुक्मिणी — (ग) दाणिं खु मे पुण्णं संपुण्णं । [परिजनं विलोक्य] तुह्मे गच्छह अय्यउत्तस्स मंगळणीराअण-संपादणस्स ।

परिजनः — (घ) तहे त्ति । [निष्क्रान्तः ।]

सुगन्धिका — (ङ) भअवं दाणिं कहिं भट्टा ।

नारदः — अयं खलु विह्वलां कुवलयावलीमाश्वासयन् दीर्घिकातटे तिष्ठति ।

क. ही !! ही !! निर्जितं प्रियवयस्येन । फलितमस्माकं भागधेयेन भगवन् ! श्रीवत्सः सकर्णस्पर्शं द्वे वारे तव श्रीचरणावभिवादयति ।

ख. भगवन् ! किमक्षतशरीरा वा मे वत्सा कुवलयावली ।

ग. इदानीं खलु मे पुण्यं सम्पूर्णम् । यूयं गच्छतार्यपुत्रस्य मङ्गल-नीराजनसम्पादनाय ।

घ. तथेति ।

ङ. भगवन् ! इदानीं कुत्र भर्ता ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सुगन्धिका — (क) भअवं! किं एत्थ गच्छामो।

नारदः — यदभिरुचितं महादेव्यै। [परिक्रामति।]

नारदः — [आत्मगतम्] अयमेवावसरो देव्यै दिव्यस्यास्य निवेदनाय। [प्रकाशम्] पुत्रि वैदर्भि! किमपि निवेदयितुमिच्छामि।

रुक्मिणी — (ख) भअवं आणवेहि।

नारदः — [जनान्तिकम्]

जानासि लक्ष्मि! भगवच्चरणारविन्द-
सेवासखीं वसुमतीं भगिनीं पुरा ते।
सैवाधुना त्वमिव देवहिताय धात्रा
सम्प्रार्थिता कुवलयावलिराविरासीत्॥ १०॥

रुक्मिणी — [आत्मगतम्] (ग) किण्णु एत्थ भअवदो जुत्तं उत्तरं होदु। [प्रकाशम्] हळा! तुमं णिवेदेहि सच्चवादिणीणं भइणिआणं। जं महोवआरिणो अय्यउत्तस्स कंठे वि उवआरं पडिअरेमि। एत्थ तुम्हेहिं अणुमदी कादव्वेत्ति।

सुगन्धिका — (घ) जं देवी आणवेदि त्ति। [निष्क्रान्ता।]

क. भगवन्! किमत्र गच्छामः।

ख. भगवन्! आज्ञापय।

ग. किन्त्वत्र भगवतो युक्तमुत्तरं भवतु। हला! त्वं निवेदय सत्यवादिनीनां भगिनिकानाम्। यन्महोपकारिण आर्यपुत्रस्य कण्ठेऽपि उपहारं प्रतिकरोमि। अत्र युष्माभिरनुमतिः कर्तव्येति।

घ. यद् देव्याज्ञापयतीति।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नारदः — साधु कल्याणशीले! साधु ।

कृतोपकारेषु जनेषु देहिना-
मकुर्वतां प्रत्युपकारमादरात् ।
किमिन्द्रसम्पत्तिविशेषया श्रिया
किमायुषा कल्पशतानुवर्तिना ॥ ११ ॥

[ततः प्रविशति विह्वला कुवलयावली निषण्णो नायकश्च ।]

नायकः — कथमिदानीमपि न समाश्वसिति मे प्राणवल्लभा । तदेनां कमलदलानीतशिशिरजलसेचनेन समाश्वासयामि । [इति किञ्चिदन्तरं परिक्रामति । समाकर्ण्य सहर्षम् ।] हन्तेयं स्वयमेव समाश्वस्ता किमपि मन्त्रयते । तदनालक्षितोऽहमाकर्णयामि । [तथा करोति ।]

कुवलयावली — (क) [परितो विलोक्य] अह्मो इदं तं एव्व उज्जाणं । [विचिन्त्य] जाव को वि अण्णो ण पेक्खइ ताव इमाए दिग्घिआए णिमज्जिऊण अप्पाणं वावादेमि । [इति शनैरुत्थाय दीर्घिकामुपसरति ।]

नायकः —

परस्परानुरागाय वासनास्थायिने नमः ।
यस्मिन् प्राणपरित्यागदशाप्युल्लासकारिणी ॥ १२ ॥

[इत्यनुपरिक्रामति ।]

क. इदं तदेवोद्यानम् । यावत् कोऽप्यन्यो न पश्यति तावदस्यां दीर्घिकायां निमज्ज्यात्मानं व्यापादयामि ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीवत्सः—(क) इदं खु उज्जाणं। पविसन्तु भवंतो।

[सर्वे प्रवेशं नाटयन्ति।]

कुवलयावली—[साञ्जलिबन्धम्]

(ख) अयि दिग्घिए णमो दे
पसीद परिगह्न जीविदं एदं।
जइ मज्झ आउसेसो
सो राआ तेण णिव्वुदो होदु॥ १३॥

(इति प्रवेष्टुमिच्छति।)

नायकः—[तां हस्ते गृहीत्वा]

अयि! त्वमेवंव्यवसायिनी प्रिये!
किमायुषा मे भवता चिरादपि।
किमिन्दुना ध्वंसितचन्द्रिकाश्रिया
किमिन्द्रनीलेन विसृष्टकान्तिना॥ १४॥

किञ्च,

निर्विश्लेषरथाङ्गमम्बरगतावर्तं सरोजे सितं (?)
निर्निद्रं करुणामृतं सुरभिशैवालं त्वदङ्गं सरः।
गाहित्वा पुटपाकमाकलयते पश्यैतदस्मन्मन-
स्तद् दीर्घाक्षि! न दीर्घिकानिपतनं सन्तापनिर्वापणम्॥

क. इदं खलूद्यानम्। प्रविशन्तु भवन्तः।

ख. अयि दीर्घिके! नमस्ते
प्रसीद परिगृहाण जीवितमेतत्।
यदि ममायुःशेषः
स राजा तेन निर्वृतो भवतु॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कुवलयावली — [नायकं विलोक्य सहर्षलज्जासम्भ्रमम् । आत्मगतम्] (क) हन्त इमस्सिं ओ(नवे ? सरे) महाभाओ एसो दिट्ठो । [प्रकाशम्] भो मुंच मं । एव्वंकआविणआ देवीआ मुहं पेक्खिदुं ण सक्कुणोमि ।

नायकः — यदि प्रिये तवायं निश्चयः

निवार्यते ततस्तस्मिन् साहसं चारुहासिनि! ।
मार्गप्रदर्शकं मन्ये मामेनं मानशालिनि! ॥ १६ ॥

ततः खलु

ताम्रोदरेण तरुणाङ्गुलिपल्लवेन
वामेन ते करतलेन करं मदीयम् ।
आलम्ब्य वाथ पुनरुक्तिजितारविन्दौ
मन्दं निधेहि चरणौ मणिकुट्टिमेषु ॥ १७ ॥

[इति दत्तहस्तः पुरस्तिष्ठति ।]

कुवलयावली — [हस्तमाकृष्य] (ख) संतं पापं संतं पापं । पडिहदं अमंगळं पडिहदं अमंगळं । [इति परिवृत्य तिष्ठति ।]

नायकः — [साकूतम्] प्रिये! दीर्घिकायामिदमेकमवलोक्यताम् ।

आचर्वणेन विरळीकृतकाण्डबन्धं
चञ्चूपुटे सहचरेण कृतं मृणाळम् ।

क. हन्त! अस्मिन्नवसरे महाभाग एष दृष्टः । भो मुञ्च माम् एवंकृताविनया देव्या मुखं प्रेक्षितुं न शक्नोमि ।

ख. शान्तं पापं शान्तं पापम् । प्रतिहतममङ्गलं प्रतिहतममङ्गलम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

हातुं ग्रहीतुमपि नेच्छति चक्रवाकी
दत्तं मयाधरमिव त्वमधीरनेत्रे! ॥ १८ ॥

कुवलयावली — (क) सो वि एको धुत्तो ।

नायकः— प्रिये! किमहमपरो धूर्तः ।

श्रीवत्सः— [सोच्चैःस्वरम्] (ख) इदो इदो देवी ।

नायकः— [समाकर्ण्य आत्मगतम्] कथं वयस्यो निवेदयति संज्ञया देवीसमागमनम् । [प्रकाशम्] कोऽत्र भोः निवेद्यतां प्रत्याहृता कुवलयावलीति ।

देवी— [उपसृत्य सहर्षम्] (ग) जेउ जेउ अय्यउत्तो ।

नायकः—[सादरम्] महादेवि! त्वदादेशादियं मया प्रत्याहृता दारिका ।

रुक्मिणी— [लज्जमानां कुवलयावलीमालिङ्ग्य] (घ) भइणिए! तुए दुईआ अक्खदसरीराए ळोअवादादो विमुक्क ह्मि ।

नायकः— कथमत्रैव भगवान् नारदः । भगवन्! अभिवादये ।

नारदः— [सहर्षातिरेकम्]

स्वस्ति श्रीवासुदेवाय स्वस्ति दानवघातिने ।
स्वस्ति मङ्गलमूलाय स्वस्ति कारुण्यशालिने ॥ १९ ॥

क. सोऽप्येको धूर्तः ।
ख. इत इतो देवी ।
ग. जयतु जयत्वार्यपुत्रः ।
घ. भगिनिके! त्वया द्वितीया अक्षतशरीरया लोकवादाद् विमुक्तास्मि ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीवत्सः— (क) वड्ढदि पिअवअस्सो देवीए चित्त-समाराहणेण ।

नायकः— [सस्मितम्] कथं प्रियवयस्यः ।

रुक्मिणी— (ख) भइणिए ! वंदेहि भअवंतं ।

कुवलयावली— [विलोक्य] (ग) हंत सो एसो भअवं तादणारदो ।

[प्रणम्याश्रु विमुञ्चति ।]

नारदः— पुत्रि ! जगत्कण्टकोद्धरणहेतुतया लोकोपकारिणीं त्वां विलोक्य कृतार्थोऽस्मि ।

[प्रविश्य]

सुगन्धिका— (घ) देवि ! सअलो वि भट्टिणीजणो विण्णवेदि । अज्जाए कज्जसमालोअणेण संतेसिद म्हि । जह महादेवीए रोअदि तह करीअदु त्ति ।

रुक्मिणी— [जनान्तिकम्] (ङ) भअवं ! समप्पेमि कुवलआवलिं अय्यउत्तस्स ।

नारदः— त्वमस्याः प्रभवसीति पुरैव निवेदितमस्माभिः ।

क. वर्धते प्रियवयस्यो देव्याश्चित्तसमाराधनेन ।

ख. भगिनिके ! वन्दस्व भगवन्तम् ।

ग. हन्त ! स एष भगवान् तातनारदः ।

घ. देवि ! सकलोऽपि भट्टिनीजनो विज्ञापयति — आर्यायाः कार्यसमालोचनेन संतोषितोऽस्मि । यथा महादेव्यै रोचते तथा क्रियतामिति ।

ङ. भगवन् ! समर्पयामि कुवलयावलीमार्यपुत्रस्य ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

रुक्मिणी—(क) अज्जउत्त! जइ अहं तुज्झ माणणिज्जा ता इअं तुए अह्मणिव्विसेसं दट्ठव्वा। [इति नायिकाहस्तं नायकस्य हस्ते समर्पयति।]

नायकः—

हन्त सममेव निहिते कुवलयदृशा कराम्बुजे प्रिययोः।
घनसारगन्धसारौ मिळिताविव तापमपनयतः॥ २०॥

नारदः—[सबहुमानम्] देव! निखिलश्रेयोनिदानमविचारेण करणीयो देव्या निदेशः।

नायकः—यदादिशति भगवान्। [इति कुवलयावल्याः करं गृह्णाति]

[सर्वे हर्षं नाटयन्ति।]

श्रीवत्सः—(ख) सुळग्गं होदु।

नारदः—तदेतदेकयैव त्वया निर्व्यूढं यदुपदिष्टमस्माभिः।

व्रतानि वर्णनीयानि सन्त्वन्यानि सहस्रशः।
परं व्रतं पुरन्ध्रीणां पतिचित्तानुरञ्जनम्॥ २१॥

इति।

[आकाशे दुन्दुभिध्वनिः।]

नारदः—देव! भवतः कुवलयावलीकल्याणमभिनन्दतां देवानामयमानन्दविलासः।

क. आर्यपुत्र! यद्यहं तव माननीया तर्हीयं त्वयास्मन्निर्विशेषं द्रष्टव्या।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

ख. सुलग्नं भवतु।

नायकः— [सप्रश्रयं नारदं प्रणम्य] भगवन्! त्वत्प्रसादेन देवीप्रसादेन च कति कति वा श्रेयांसि न मामनुबध्नन्ति। [सहर्षोत्कर्षम्]

रम्या वागिव सुप्रसादमधुरा देवीमणी रुक्मिणी
सन्मानार्थ इवात्युदारगरिमा स त्वं परिद्योतसे।
कन्येयं करवल्लरीव विलसत्यन्योन्यमैत्रीक्रमो
युष्माकं भुवि सादृशान् सहृदयानानन्दयन्नेधताम्॥ २२॥

नारदः— किं ते भूयः प्रियं करोमि।

नायकः—

गाढं मानमपास्य मे हितकरः सर्वोऽपि देवीगणः
कन्यारत्नमिदं मनोहरगुणे देवीपदे स्थापितम्।
कर्तव्येषु हिताहितेषु भगवान् प्रीत्या प्रशास्त्यन्वहं
तत् पूर्णानि ममेप्सितानि हि भवद्भूते भविष्यन्ति च ॥२३॥

तथाचेदमस्तु भरतवाक्यम्—

कल्याणमस्तु जगतां सततं त्रयाणां
संवर्धितो भवतु वैदिक एव मार्गः।
सारस्वतानि सरसानि कवीश्वराणां
मात्सर्यदिग्धहृदया न कलङ्कयन्तु॥ २४॥

[इति निष्क्रान्ताः सर्वे।]

चतुर्थोऽङ्कः।

पूर्णेयं शिङ्गभूपेन ग्रथिता मधुजल्पितैः।
रत्नपाञ्चालिका नाम नाटिका रसपेटिका॥

शुभं भूयात्॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

LIST OF SANSKRIT PUBLICATIONS FOR SALE.

	RS.	AS.	P.
भक्तिमञ्जरी **Bhaktimanjari** (Stuti) by H. H. Svāti Śrī Rāma Varma Mahārāja.	1	0	0
स्यानन्दूरपुरवर्णनप्रबन्धः **Syanandurapuravarnana-prabandha** (Kāvya) by H. H. Svāti Śrī Rāma Varma Mahārāja, with the commentary Sundarī of Rājarāja Varma Koil Tampurān.	2	0	0

Trivandrum Sanskrit Series.

	RS.	AS.	P.
No. 1—दैवम् **Daiva** (Vyākaraṇa) by Deva with Puruṣakāra of Kṛṣṇalīlāśukamuni (*out of stock*).	1	0	0
No. 2—अभिनवकौस्तुभमाला-दक्षिणामूर्त्तिस्तवौ **Abhinavakaustubhamala and Daksinamurtistava** by Kṛṣṇalīlāśukamuni (*out of stock*).	0	2	0
No. 3—नलाभ्युदयः **Nalabhyudaya** (Kāvya) by Vāmana Bhaṭṭa Bāṇa (*second edition*).	0	4	0
No. 4—शिवलीलार्णवः **Sivalilarnava** (Kāvya) by Nīlakaṇṭa Dīkṣita (*out of stock*).	2	0	0
No. 5—व्यक्तिविवेकः **Vyaktiviveka** (Alaṅkāra) by Mahima-Bhaṭṭa with commentary (*out of stock*).	2	12	0
No. 6—दुर्घटवृत्तिः **Durghatavrtti** (Vyākaraṇa) by Śaraṇadeva (*out of stock*).	2	0	0
No. 7—ब्रह्मतत्त्वप्रकाशिका **Brahmatattvaprakasika** (Vedānta) by Sadāśivendrasarasvatī (*out of stock*).	2	4	0
No. 8—प्रद्युम्नाभ्युदयम् **Pradyumnabhyudaya** (Nāṭaka) by Ravi Varma Bhūpa (*out of stock*).	1	0	0

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

	RS.	AS.	P.
No. 9—विरूपाक्षपञ्चाशिका **Virupaksapancasika** (Vedānta) by Virūpākṣanātha with the commentary of Vidyācakravartin (*out of stock*).	0	8	0
No. 10—मातङ्गलीला **Matangalila** (Gajalakṣaṇa) by Nīlakaṇṭha (*out of stock*).	0	8	0
No. 11—तपतीसंवरणम् **Tapatisamvarana** (Nāṭaka) by Kulaśekhara Varma with the commentary of Śivarāma (*out of stock*).	2	4	0
No. 12—परमार्थसारम् **Paramarthasara** (Vedānta) by Ādiśeṣa with the commentary of Rāghavānanda (*out of stock*).	0	8	0
No. 13—सुभद्राधनञ्जयम् **Subhadradhananjaya** (Nāṭaka) by Kulaśekhara Varma with the commentary of Śivarāma (*out of stock*).	2	0	0
No. 14—नीतिसारः **Nitisara** (Nīti) by Kāmandaka, with the commentary of Śankarārya (*out of stock*).	3	8	0
No. 15—स्वप्नवासवदत्तम् **Svapnavasavadatta** (Nāṭaka) by Bhāsa (*second edition*).	1	8	0
No. 16—प्रतिज्ञायौगन्धरायणम् **Pratijnayaugandharayana** (Nāṭaka) by Bhāsa (*out of stock*).	1	8	0
No. 17—पञ्चरात्रम् **Pancaratra** (Nāṭaka) by Bhāsa (*out of stock*).	1	0	0
No. 18—नारायणीयम् **Narayaniya** (Stuti) by Nārāyaṇa Bhaṭṭa with the commentary of Deśamangalavārya (*second edition*).	4	0	0
No. 19—मानमेयोदयः **Manameyodaya** (Mīmāmsā) by Nārāyaṇa Bhaṭṭa and Nārāyaṇa Paṇḍita (*out of stock*).	1	4	0
No. 20—अविमारकम् **Avimaraka** (Nāṭaka) by Bhāsa (*out of stock*).	1	8	0
No. 21—बालचरितम् **Balacarita** (Nāṭaka) by Bhāsa (*out of stock*)	1	0	0

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

	Rs.	As.	P.
No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारोरुभङ्गानि **Madhyamavyayoga-Dutavakya-Dutaghatotkaca-Karnabhara and Urubhanga** (Nāṭaka) by Bhāsa (*out of stock*).	1	8	0
No. 23—नानार्थार्णवसंक्षेपः **Nanartharnavasamksepa** (Kośa) by Keśavasvāmin (Part I, 1st and 2nd Kāṇḍas). (*out of stock*).	1	12	0
No. 24—जानकीपरिणयः **Janakiparinaya** (Kāvya) by Cakra Kavi (*out of stock*).	1	0	0
No. 25—काणादसिद्धान्तचन्द्रिका **Kanadasiddhantacandrika** (Nyāya) by Gaṅgādharasūri (*out of stock*).	0	12	0
No. 26—अभिषेकनाटकम् **Abhisekanataka** by Bhāsa (*out of stock*).	0	12	0
No. 27—कुमारसम्भवः **Kumarasambhava** (Kāvya) by Kāḷidāsa with the two commentaries, Prakāśikā of Aruṇagirinātha and Vivaraṇa of Nārāyaṇa Paṇḍita (Part I, 1st and 2nd Sargas) (*out of stock*).	1	12	0
No. 28—वैखानसधर्मप्रश्नः **Vaikhanasadharmaprasna** (Dharmasūtra) by Vikhanas (*out of stock*).	0	8	0
No. 29—नानार्थार्णवसंक्षेपः **Nanartharnavasamksepa** (Kośa) by Keśavasvāmin (Part II, 3rd Kāṇḍa) (*out of stock*).	2	4	0
No. 30—वास्तुविद्या **Vastuvidya** (Śilpa) (*out of stock*).	0	12	0
No. 31—नानार्थार्णवसंक्षेपः **Nanartharnavasamksepa** (Kośa) by Keśavasvāmin (Part III, 4th, 5th and 6th Kāṇḍas).	1	0	0
No. 32—कुमारसम्भवः **Kumarasambhava** (Kāvya) by Kālidāsa with the two commentaries, Prakāśikā of Aruṇagirinātha and Vivaraṇa of Nārāyaṇa Paṇḍita (Part II, 3rd, 4th and 5th Sargas) (*out of stock*)	2	8	0

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

	RS.	AS.	P.
No. 33—**वाररुचसंग्रहः Vararucasangraha** (Vyākaraṇa) with the commentary Dīpaprabhā of Nārāyaṇa (*out of stock*).	0	8	0
No. 34—**मणिदर्पणः Manidarpana** (Nyāya) by Rājacūḍāmaṇimakhin.	1	4	0
No. 35—**मणिसारः Manisara** (Nyāya) by Gopīnātha.	1	8	0
No. 36—**कुमारसम्भवः Kumarasambhava** (Kāvya) by Kāḷidāsa with the two commentaries, Prakāśikā of Aruṇagirinātha and Vivaraṇa of Nārāyaṇa Paṇḍita (Part III, 6th, 7th and 8th Sargas).	3	0	0
No. 37—**आशौचाष्टकम् Asaucastaka** (Smṛti) by Vararuci with commentary.	0	4	0
No. 38—**नामलिङ्गानुशासनम् Namalinganusasana** (Kośa) by Amarasimha with the commentary Ṭīkāsarvasva of Vandyaghaṭīya Sarvānanda (Part I, 1st Kāṇḍa).	2	0	0
No. 39—**चारुदत्तम् Carudatta** (Nāṭaka) by Bhāsa (*out of stock*).	0	12	0
No. 40—**अलङ्कारसूत्रम् Alankarasutra** by Rājānaka Ruyyaka with the Alaṅkārasarvasva of Mankhūka and its commentary by Samudrabandha (*second edition*).	2	8	0
No. 41—**अध्यात्मपटलम् Adhyatmapatala** (Vedānta) by Āpastamba with Vivaraṇa of Śrī Śaṅkara-Bhagavat-Pāda (*out of stock*).	0	4	0
No. 42—**प्रतिमानाटकम् Pratimanataka** by Bhāsa (*second edition*).	1	8	0
No. 43—**नामलिङ्गानुशासनम् Namalinganusasana** (Kośa) by Amarasimha with the two commentaries, Amarakośodghāṭana of Kṣīrasvāmin and Ṭīkāsarvasva of Vandyaghaṭīya Sarvānanda (Part II, 2nd Kanda, 1-6 vargas).	2	8	0
No. 44—**तन्त्रशुद्धम् Tantrasuddha** by Bhaṭṭāraka Vedottama (*out of stock*).	0	4	0

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

	RS.	AS.	P.
No. 45—प्रपञ्चहृदयम् **Prapancahrdaya.**	1	0	0
No. 46—परिभाषावृत्तिः **Paribhasavrtti** (Vyākaraṇa) by Nīlakaṇṭa Dīkṣita.	0	8	0
No. 47—सिद्धान्तसिद्धाञ्जनम् **Siddhantasiddhanjana** (Vedānta) by Kṛṣṇānanda Sarasvatī (Part I.)	1	12	
No. 48—सिद्धान्तसिद्धाञ्जनम् Do. Do. (Part II).	2	0	0
No. 49—गोलदीपिका **Goladipika** (Jyotiṣa) by Parameśvara.	0	4	0
No. 50—रसार्णवसुधाकरः **Rasarnavasudhakara** (Alaṅkâra) by Siṅga Bhūpāla.	3	0	0
No. 51—नामलिङ्गानुशासनम् **Namalinganusasana** (Kośa) by Amarasimha with the two commentaries, Amarakośodghāṭana of Kṣīrasvāmin and Tīkāsarvasva of Vandyaghaṭīya Sarvānanda (Part III, 2nd Kanda, 7-10 vargas).	2	0	0
No. 52—नामलिङ्गानुशासनम् **Namalinganusasana** (Kośa) by Amarasimha with the commentary Tîkâsarvasva of Vandyaghaṭîya Sarvânanda (Part IV, 3rd Kâṇḍa).	1	8	0
No. 53—शाब्दनिर्णयः **Sabdanirnaya** (Vedânta) by Prakâśâtmayatîndra.	0	12	0
No. 54—स्फोटसिद्धिन्यायविचारः **Sphotasiddhinyayavicara** (Vyâkaraṇa).	0	4	0
No. 55—मत्तविलासप्रहसनम् **Mattavilasaprahasana** (Nâṭaka) by Mahendravikramavarman. (*out of stock*).	0	8	0
No. 56—मनुष्यालयचन्द्रिका **Manusyalayacandrika** (Śilpa) (*out of stock*).	0	8	0
No. 57—रघुवीरचरितम् **Raghuviracarita** (Kâvya).	1	4	0
No. 58—सिद्धान्तसिद्धाञ्जनम् **Siddhantasiddhanjana** (Vedânta) by Kṛṣṇânanda Sarasvatî (Part III).	2	0	0

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

	RS.	AS.	P.
No. 59—नागानन्दम् **Nagananda** (Nâṭaka) by Harṣadeva with the commentary Vimarśinī of Śivarâma (*out of stock*).	3	4	0
No. 60—लघुस्तुति: **Laghustuti** by Laghubhaṭṭâraka with the commentary of Râghavânanda.	0	8	0
No. 61—सिद्धान्तसिद्धाञ्जनम् **Siddhantasiddhanjana** (Vedânta) by Kṛṣṇânanda Sarasvatī (Part IV).	1	4	0
No. 62—सर्वमतसंग्रह: **Sarvamatasangraha.** (*out of stock*).	0	8	0
No. 63—किरातार्जुनीयम् **Kiratarjuniya** (Kâvya) by Bhāravî with the commentary Śabdârthadīpika of Citrabhânu (1, 2 and 3 Sargas).	2	8	0
No. 64—मेघसन्देश: **Meghasandesa** by Kâlidāsa with the commentary Pradīpa of Dakṣiṇâvartanātha.	0	12	0
No. 65—मयमतम् **Mayamata** (Śilpa) by Mayamuni (*out of stock*).	3	4	0
No. 66—महार्थमञ्जरी **Maharthamanjari** (Darśana) with the commentary Parimala of Maheśvarânanda.	2	4	0
No. 67—तन्त्रसमुच्चय: **Tantrasamuccaya** (Tantra) by Nârâyaṇa with the commentary Vimarśinī of Śaṅkara (Part I, 1–6 Paṭalās) (*out of stock*).	3	4	0
No. 68—तत्त्वप्रकाश: **Tattvaprakasa** (Āgama) by Śrī Bhojadeva with the commentary Tâtparyadīpikā of Śrī Kumāra	1	12	0
No. 69—ईशानशिवगुरुदेवपद्धति: **Isanasivagurudevapaddhati** (Tantra) by Īśânaśivagurudevamiśra Part I, Sâmânyapâda).	1	8	0
No. 70—आर्यमञ्जुश्रीमूलकल्प: **Aryamanjusrimulakalpa** (Part I).	2	8	0

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

	RS.	AS.	P.
No. 71—तन्त्रसमुच्चयः **Tantrasamuccaya**(Tantra) by Nârâyaṇa with the commentary Vimarśinī of Śaṅkara(Part II, 7—12 Paṭalās) (*out of stock*).	3	8	0
No. 72—ईशानशिवगुरुदेवपद्धतिः **Isanasivaguru-devapaddhati** (Tantra) by Īśānaśiva-gurudevamiśra (Part II. Mantrapāda).	4	0	0
No. 73—ईश्वरप्रतिपत्तिप्रकाशः **Isvarapratipatti-prakasa** (Vedānta) by Madhusūdana-sarasvatī.	0	4	0
No. 74—याज्ञवल्क्यस्मृतिः **Yajnavalkyasmrti** with the commentary Bâlakrîḍâ of Viśvarûpâcârya (Part I — Âcâra and Vyavahâra Adhyâyās).	3	4	0
No. 75—शिल्परत्नम् **Silparatna** (Śilpa) by Śrī-kumâra (Part I).	2	12	0
No. 76—आर्यमञ्जुश्रीमूलकल्पः **Aryamanjusrimula-kalpa** (Part II).	3	0	0
No. 77—ईशानशिवगुरुदेवपद्धतिः **Isanasivaguru-devapaddhati** (Tantra) by Īśānaśiva-gurudevamiśra (Part III, Kriyāpāda 1—30 Paṭalās).	3	0	0
No. 78—आश्वलायनगृह्यसूत्रम् **Asvalayanagrhya-sutra** with the commentary Anāvilā of Haradattācārya.	2	6	0
No. 79—अर्थशास्त्रम् **Arthasastra** of Kauṭalya with commentary by Mahāmahopādhyāya T. Gaṇapati Śāstri (Part I, 1 & 2 Adhikaraṇās).	3	12	0
No. 80—अर्थशास्त्रम् **Do.** Do. (Part II, 3—7 Adhikaraṇās).	4	0	0
No. 81—याज्ञवल्क्यस्मृतिः **Yajnavalkyasmrti** with the commentary Bālakrīḍa of Viśva-rūpācārya (Part II. Prâyaścit-tâdhyâya).	2	0	0
No. 82—अर्थशास्त्रम् **Arthasastra** of Kauṭalya with commentary by Mahāmahopā-dhyāya T. Gaṇapati Śāstri (Part III, 8—15 Adhikaraṇās).	3	4	0

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

	Rs.	As.	P.
No. 107—काव्यरत्नम् Kavyaratna (Kāvya) of Arhaddāsa	0	12	0
No. 108—बालमार्ताण्डविजयम् Balamartanda-vijaya (Nāṭaka) of Devarājakavi.	1	8	0
No. 109—न्यायसारः Nyayasara with the commentary of Vāsudevasūri.	1	8	0
No. 110—आर्यभटीयम् Aryabhatīya (Jyotiṣā) of Āryabhaṭācārya with the Bhāṣya of Nīlakaṇṭhasomasutvan.(Part II. Kālakriyāpāda)	1	0	0
No. 111—हृदयप्रियः Hridayapriya (Vaidyaka) by Parameśvara,	3	0	0
No. 112—कुचेलोपाख्यानम् अजामिलोपाख्यानं च । Kucelopakhyana and Ajamilo-pakhyana (Saṅgīta) by H. H. Svāti Śrī Rāma Varma Mahārāja.	0	4	0
No. 113—सङ्गीतकृतयः Sangitakrtis (Gāna) of H. H. Svāti Śrī Rāma Varma Mahārāja.	1	0	0
No. 114—साहित्यमीमांसा Sahityamimamsa (Alaṅkāra)	1	0	0
No. 115—ऋक्संहिता Rksamhita (with the Bhāṣya of Skandasvāmin and the commentary of Veṅkaṭamādha-vārya) (Part II 2nd Adhyāya in the Ist Aṣṭaka.)	1	8	0
No. 116—वाक्यपदीयम् Vakyapadiya (Vyākaraṇa) with the commentary Prakīrṇaka-prakāśa by Helarāja son of Bhūtirāja. Part I).	1	8	0
No. 117—सरस्वतीकण्ठाभरणम् Sarasvatikanta-bharana (Vyākaraṇa) by Bhojadeva with the commentary of Śrī Nārāyaṇa Daṇḍanātha. (Part I).	1	8	0

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

	RS.	AS.	P.
No. 118—बालराममरतम् Balaramabharata (Nāṭya) by Bālarāma Varma Vañci Māhāraja.	2	8	0
No. 119—विवेकमार्तण्डः Vivekamartanda (Vedānta) of Viśvarūpadeva	0	8	0
No. 120—शौनकीयम् Saunakiya (Smṛti)	0	8	0
No. 121—वैखानसागमः Vaikhanasagama (Tantra) of Marīci.	2	0	0
No. 122—प्रबोधचन्द्रोदयम् Prabodhacandrodaya (Nāṭaka) by Kṛṣṇamiśrayati with the commentary Nāṭakābharaṇa of Śrī Govindāmṛtabhagavān.	2	0	0
No. 123—सङ्ग्रामविजयोदयः Sangramavijayodaya (Jyotiṣa).	2	0	0
No. 124—हरमेखला Haramekhala (Vaidyaka) of Māhuka with commentary (Part I. chapters 2, 3 & 4)	1	8	0
No. 125—कोकसन्देशः Kokasandesa (Kāvya) by Viṣṇutrāta.	0	8	0
No. 126—करणपद्धतिः Karanapaddhati (Jyotiṣa).	0	4	0
No. 127—सरस्वतीकण्ठाभरणम् Sarasvatikantabharana (Vyākaraṇa) by Bhojadeva with the commentary of Śrī Nārāyaṇa Daṇḍanātha. (Part II).	1	8	0
No. 128—भृङ्गसन्देशः Bhrngasandesa (Kāvya) by Vāsudeva.	0	6	0
No. 129—हंससन्देशः Hamsasandesa (Kāvya)	1	4	0
No. 130—महानयप्रकाशः Mahanayaprakasa (Vedānta) by Abhinavaguptācārya.	0	8	0
No. 131—वृत्तवार्त्तिकम् Vrttavartika (Chandas) by Rāmapāṇivāda	1	8	0

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

		RS.	AS.	P.
No. 132—तन्त्रोपाख्यानम्	Tantropakhyana (Kāvya)	0	6	0
No. 133—उदयवर्मचरितम्	Udayavarmacarita.	0	4	0
No. 134—योगयाज्ञवल्क्यम्	Yogayajnavalkya	0	4	0
No. 135—सर्वदर्शनकौमुदी	Sarvadarsanakaumudi by Mādhavasarasvatī.	1	0	0
No. 136—हरमेखला	Haramekhala of Māhuka with commentary (Part II Chapter 5)	0	8	0
No. 137—स्कान्दशारीरकम्	Skandasariraka with commentary.	2	4	0
No. 138—आश्वलायनगृह्यमन्त्रव्याख्या	Asvalayana-grhyamantravyakhya of Haradattamiśra.	2	8	0
No. 139—प्रक्रियासर्वस्वम्	Prakriyasarvasva (Vyākaraṇa) of Śrī Nārāyaṇabhaṭṭa with the commentary of K. Sāmbaśiva Śāstrī (Part II).	0	12	0
No. 140—सरस्वतीकण्ठाभरणम्	Sarasvatikanthabharana (Vyākaraṇa) by Bhojadeva with the commentary of Śrī Nārāyaṇa Daṇḍanātha (Part III).	1	8	0
No. 141—सूक्तिरत्नहारः	Suktiratnahara.	2	0	0
No. 142—वास्तुविद्या (सव्याख्या)	Vastuvidya (Śilpa) with the commentary of K. Mahādeva Śāstrī.	1	4	0
No. 143—पाशुपतसूत्रम्	Pasupatasutra with Pancharathabhashya of Kaundinya.	2	0	0
No. 144—आग्निवेश्यगृह्यसूत्रम्	Agnivesyagrhyasutra	2	0	0
No. 145—कुवलयावली	Kuvalayavali (Drama) by Singabhupala.	1	8	0

Apply to:—

The Superintendent,
Government Press,
Trivandrum.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(परिक्रम्य) अये! अयं काश्यपायनः । (आकाशे) किमाह भवान्—कौत्स, कुतो भवानागच्छति—इति? कुलपतिनिदेशादमितश्चण्डिकायतनं पम्पासरः-समीपवर्तिनि कुलक्रमागतस्य सख्युः कुञ्जरकस्य परिग्रहभूते व्याधकिष्किन्धनाम्नि दुर्गस्थाने प्रतापावसरप्रतीक्षया प्रच्छन्नोषितं कुमारं कल्याणवर्माणं सुखमहर्विहारं पृष्ट्वा प्रतिनिवृत्तोऽस्मि । किमाह भवान्—कथमितः प्रथिततरमेव वैरिवर्गाधिष्ठितराज्यप्रत्यानयनोपायचिन्तकः पाटलिपुत्रं गतो नाद्यापि प्रतापावसरमापादितवान् मन्त्रगुप्तः—इति? ननु प्रमादभीरुत्वाद्विवेकिनां कालक्षेपवत्यः कार्यसिद्धयः । किमाह भवान्—कथं च कुलपतिरेव जाबालिस्तपःप्रभावेन तां सिद्धिं नाभ्यर्थितः कुमारेण—इति? पराक्रमोपनतामेव सिद्धिमभिकाङ्क्षते क्षात्रं तेजः । किं ब्रवीषि—एवमेतत्, गच्छतु भवान्, अहमपि समित्कुशकुसुमान्युपहरामि—इति? साधयतु भवान्, अहमपि कुलपतिं द्रक्ष्यामि ।

(इति निष्क्रान्तः)

विष्कम्भकः

(ततः प्रविशति कुमारः)

कुमा—येषामाख्या सहायान् गणयति गणनां नैकयाप्यङ्गुलीनां
तेषां तोयप्रदानं परिहरति रणस्वर्गिणां पूर्वजानाम् ।
तेषां सुप्तेव कीर्तिः प्रतिवसति यथा स्वेगृहे सालभञ्जी
येषां शेषामिवाज्ञां शिरसि नृपतयः श्रद्दधाना वहन्ति ॥ ८ ॥

तावदस्य तपनीयाशोकतरोरधश्छायायामुपविशामि यावत् कुञ्जरकसकाशात् प्रतिनिवर्तते वयस्यवैखानसः । (तथा कृत्वा) अहो प्रवालशीतलेयं तरुतलच्छाया ।

सम्प्रत्यहं भृङ्गकुलानुयातै-
र्गृहीतगन्धद्विपदानगन्धैः ।
विन्ध्यानिलैः शैशवभुक्तमुक्तं
प्रबोधितः पाटलिपुत्रवासम् ॥ ९ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(निःश्वस्य) तामेव शैशवकथामनुस्मरामि । तदा हि—

सन्नद्धः कवची शरासनधरस्तातो रुषा प्रोषितो
जाता धौतकपोलपत्रलतिका बाष्पाम्बुभिर्मातरः ।
एकाकी चलकाकपक्षविभवो नीतोऽस्म्यहं तापसै-
र्मिथ्येव प्रतिभाति शैशवकथा स्वप्नो नु माया नु मे ॥ १० ॥

अथ वा कृतमनया कातरजनोचितया निपातोदन्ताचिन्तया । तेजस्विनो हि पुरुषस्य सम्पदुद्योतनप्रतिपक्षभूता विपदपि न च्छायेव परिहरति पार्श्वम्, न पुनरुदाराः परिहीयन्ते । कुतः—

ध्वस्तः सुन्दरपाटलो निपतितः कात्यायनः शक्तितः
प्राप्तं भैरवमन्धकारगहनं प्रद्योतकारागृहम् ।
तेजोराशिरवाप्तवानुदयनस्तैस्तैरुपायक्रमैः
कौशाम्बीं च सुयामुनं च विजयी भूयोऽपि वत्सेश्वरः ॥ ११ ॥

भोः पाटलिपुत्रगतमन्त्रगुप्तदूतप्रतिप्रेषणावधिकमपि काललेशमत्रैव तिष्ठन्नप्रतिप्रसरवन्ध्यममर्षं धारयितुं न शक्नोमि । (निमित्तं सूचयित्वा) किं नु खलु स्फुरति दक्षिणो मे बाहुः !

स्वजने शोकसन्तप्ते प्राप्तैश्वर्येष्वरातिषु ।
नाद्यापि धनुरादत्ते बाहुर्वामेतरो मम ॥ १२ ॥

(शब्दं रूपयित्वा) को नु खल्वेष क्रमलमधुपानमत्तकलहंसनिर्भरो निनादः श्रूयते? अथ वा नेदं कलहंसविरुतम् । कुतः—

काञ्चीकलरवोन्मिश्रं पादक्रमविलम्बितम् ।
मञ्जुवाचामिदं मन्ये मञ्जु मञ्जीरशिञ्जितम् ॥ १३ ॥

भवतु, शब्दानुसारेण चक्षुर्विक्षिपामि । (तथा कृत्वा) अये! पल्लवितमिव जीवलोकं पश्यामि । का नु खल्वेषा परिमितपरिवारा तारागणपरिवृता शशाङ्कलेखेव लक्ष्यते कुमारी ?

वामोरूमूरुजातां विदुरुरुजघनामुर्वशीं विश्वयोनेः
सीतां सीतामसूतिं श्रियमपि मथितादम्बुराशेरुशन्ति ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

न त्वस्या जन्म जाने जननयनमधुस्यन्दिनी कान्तिलक्ष्मी-
र्मध्येवेदि प्रसूतां द्रुपददुहितरं वेदिमध्यां वदन्ति ॥ १४ ॥

(ततः प्रविशति ससखीगणा कीर्तिमती काञ्चुकीयश्च)

का— इत इतो भवती ।

की— हला णिउणिए, किं णु खु पसण्णं विअ मे हिअअं ?
(हला निपुणिके, किं नु खलु प्रसन्नमिव मे हृदयम् ?)

नि— भट्टिदारिए, भअवदीए भत्तजणाणुकंपिणीए पादवंदणं करिअ णिग्गदासि, कीस ण पसण्णं होइ दे हिअअं ?

(भर्तृदारिके, भगवत्या भक्तजनानुकम्पिन्याः पादवन्दनं कृत्वा निर्गतासि, कथं न प्रसन्नं भवति ते हृदयम् ?)

की— जुत्तं तुए भणिदं, सोढव्ववेदणं दाणिं मे तादस्स अंबाए अ विओअदुक्खं भअवदीदंसणेण ।

(युक्तं त्वया भणितम्, सोढव्यवेदनमिदानीं मे तातस्याम्बायाश्च वियोगदुःखं भगवतीदर्शनेन).

नि— अइरादो पसादं वि दंसइस्सदि भअवदी ।
(अचिरात् प्रसादमपि दर्शयिष्यति भगवती).

कु — सर्वथा मकरकेतुमन्तरेण नास्याः समुत्पत्तिं पश्यामि । तथा हि—

सर्गान्तराणि सकलान्यतिवर्तमान-
मस्या वपुर्न खलु शिल्पफलं विधातुः ।
शङ्के वृषाङ्कविजयाय मनोभवेन
तप्तस्य सोऽयमनघस्तपसो विपाकः ॥ १५ ॥

की— कोकिलकंठराअकोमलगीदिसद्दो चडुलपदाआणिवहो कंचणणिम्मिदो किं एस पासादो ? (कोकिलकण्ठरागकोमलगीतिशब्दः चटुलपताकानिवहः काञ्चननिर्मितः किमेष प्रासादः ?)

नि— भट्टिदारिए, णत्थि एत्थ पासादो, एसो खु कुसुममंजरीपुंजपिंजरिअसाहासहस्सो मंदपवणंदोलिअपल्लवपुडो महुअरमहुरुल्लावमणोहरो असोअरुक्खो ।

CC-0. Prof Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पुव्विणा पच्चादिट्ठा दाणिं पमअवणपावपाणं समिद्धी । (भर्तृदारिके, नास्त्यत्र प्रासादः, एष खलु कुसुममञ्जरीपुञ्जपिञ्जरितशाखासहस्रो मन्दपवनान्दोलित-पल्लवपुटो मधुकरमधुरोल्लापमनोहरोऽशोकवृक्षः । एतेन प्रत्यादिष्टो इदानीं प्रमदवनपादपानां समृद्धिः).

की—हंजे, अत्थि किं इमस्स सुहसीदलं तलच्छाआमण्डलं ?
(हञ्जे, अस्ति किमेतस्य सुखशीतलं तलच्छायामण्डलम् ?

नि— को एत्थ संदेहो ? (कोऽत्र सन्देहः ?)

की—कहं तुवं दूरगदा जाणिस्ससि ? (कथं त्वं दूरगता जानासि ?)

नि— आकिदिप्पच्चएण भणामि । जइ अत्थि तदो किं ?
(आकृतिप्रत्ययेन भणामि । यद्यस्ति ततः किम् ?)

की— उंमत्तिए, परिस्संतो जणो विस्समं लभेदि ।
(उन्मत्ते, परिश्रान्तो जनो विश्रमं लभते).

नि—अंअ, परिस्संता भट्टिदारिआ । (आर्य, परिश्रान्ता भर्तृदारिका).

का— भोः परिश्रान्ता सिद्धायतनेषु वाहनारोहणातिक्रमः परिहरणीय इति पादचार-प्रवृत्ता भर्तृदुहिता । देवि, मुहूर्तमस्य तपनीयाशोकतरोरधश्छायायामुपवि-शामः, स्वयमेवोपकल्पितमावासस्थानमन्तःपुराधिकृतः सिंहलको निवेदयिष्यति ।

(सर्वे परिक्रामन्ति)

कु — संप्रति चरितार्थं चक्षुः—

पादौ पल्लवकोमलौ करिकरश्रीचोरमूरुद्वयं
विस्तीर्णं जघनस्थलं तनुतरो मध्यः स्तनावुन्नतौ ।
बाहू चम्पकपुष्पदामरुचिरौ पूर्णेन्दुकल्पं मुखं
केशाः कुञ्चितमेचकाः नववधूरेषा वधूलक्षणम् ॥ १६ ॥

(सर्वे कुमारं दृष्ट्वा संभ्रान्ताः)

का—महदिदमाकारबद्धं तेजः, यदस्य दर्शने बहुदिवसाधिष्ठितराजान्तःपुरस्यापि तत्पूर्वोपनतराजदर्शनस्येव शिथिलीभूतः सत्त्वावष्टम्भः । कोऽसाविति जिज्ञा-समानोऽपि नैनमनुपोद्धातः प्रष्टुमुत्सहे । सर्वथा तावत्—

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कर्णान्तविश्रान्तविलोचनश्री-
ज्यार्घातरेखारचितप्रकोष्ठः ।
तेजोनिधिर्नूनमसौ कुमारः
कुलस्य सारोद्धरणं नृपाणाम् ॥ १७ ॥

कु — स्वागतमत्रभवतः, अत्र पूर्वोपविष्टा वयम्, तदिहास्यतां भवद्भिः ।

विन्ध्याद्रिगन्धगजदानसुगन्धयोऽमी
पम्पासरःसलिलवीचिविमर्दशीताः ।
श्रोणीपयोधरसमुद्वहनप्रवृत्तं
मार्गश्रमं व्यपनयन्तु वनान्तवाताः ॥ १८ ॥

(सर्वे उपविष्टाः)

नि — (जनान्तिकम्) भट्टिदारिए, किं णु पुंणमासीचंदमंडलादो विअ इमस्स मुहादो अमुअरसनिस्संदो निस्सरइ ? (भर्तृदारिके, किं नु पौर्णमासीचन्द्रमण्डलादिव एतस्य मुखादमृतरसनिष्यन्दो निःसरति ?)

की — (आत्मगतम्) एंतरं पेक्खंतस्स वि जणस्स चंदसिलामअं विअ अमुअरसणि-स्संदणिब्भरं होइ हिअअं । (प्रकाशम्) हला, अग्गदो होहि । (एवदन्तरं प्रेक्षमाणस्यापि जनस्य चन्द्रशिलामयमिवामृतरसनिष्यन्दनिर्भरं भवति हृदयम् । (प्रकाशम्) हला, अग्रतो भव ।

नि — अपुरुवपुरुसदंसणेण ण वड्ढाविदा भट्टिदारिआ । (तथा कृत्वा) (अपवारित-केन सस्मितम्) अइ, परिहरइ चंददंसणं कमलिणि त्ति सच्चो दाणिं लोअप्प-वादो । (अपूर्वपुरुषदर्शनेन न वर्धापिता(?) भर्तृदारिका । (तथा कृत्वा) (अपवारितकेन सस्मितम्) अयि, परिहरति चन्द्रदर्शनं कमलिनीति सत्य इदानीं लोकप्रवादः ।

की — (भ्रुकुटीकुटिलनिरीक्षितकेण निपुणिकां पश्यति).

कु — आर्य, आश्चर्यदर्शनं हि कुतूहलस्थानं तदुच्यते । आकृतिप्रत्ययादेवास्या राज-वंशाभिजनत्वमनाख्यातनिश्चितम्; किं तु—

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सा राजपुत्री सुगृहीतनाम्नां
किंनामधेयं कुलमीश्वराणाम् ।
अन्वग्रहीज्जन्ममहोत्सवेन
श्रीरेव साक्षादिव सागराणाम् ॥ १९ ॥

का—श्रोतुमर्हति महाभागः । अस्ति शूरसेनो नाम जनपदः । तेषां स्वामी विख्यातकीर्तिः कीर्तिषेणो देवः,

अन्ये मन्युमहाभुजङ्गमितरे नीतिग्रहावग्रहं
प्राप्य प्राञ्जलयोऽपरे बलरजोवेतालरुद्धा दिशः ।
तन्त्रावापविदो नरेन्द्रपदवीं यातस्य यस्याधिकं
रक्षाभूतिमिवोद्वहन्ति शिरसा श्रीपादधूलीर्नृपाः ॥ २० ॥

कु—श्रूयते शूरसेनाधिपतिः कीर्तिषेणो देवः । स इदानीं मध्यमो मध्यमलोकपालानाम् । ततस्ततः ।

का—ततस्तस्येयमेका दुहिता प्राणेभ्योऽपि गरीयसी कीर्तिमती नाम ।

कु—हिमवतो ननु गङ्गा प्रभवति । किमर्थं पुनरिदानीम्—

हर्म्याग्रसञ्चरणदुर्ललितौ पुरे द्वौ
मञ्जीरमञ्जुरवशिञ्जितराजहंसौ ।
धत्तः पदं मुनिवने मनुजेन्द्रपुत्र्याः
प्रौढप्ररूढकुशकण्टकसीम्नि पादौ ॥ २१ ॥

का—एतदपि श्रूयताम् । सेयमपर्याप्तशैशवक्रीडारसैव—

यौवनारम्भयोगेन शोभामसदृशीं गता ।
शिक्षागुणविशेषेण सूरेरिव सरस्वती ॥ २२ ॥

कु—ततस्ततः ।

का—ततो यत् प्रतिपन्नयौवनासु पितृभिः प्रतिपत्तव्यं तद्भगवत्यनुमतेनैव वर्त्मना—इति कृतनिश्चयः स्वयमेव दुहितरं 'चण्डिकायतनं गत्वा कानिचिदहान्याराधयतु भगवतीं विन्ध्यवासिनीम्' इति साभिसरामेनामितः प्रेषितवान् यदुनाथः । भद्रं तव ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कुमा—अशक्यारम्भप्रवृत्तं तत्रभवन्तं मथुरेश्वरं पश्यामि—

इदं किलाविष्कृतकान्तिविप्लवं
तुषारवातातपदर्शनेष्वपि ।
शरीरमुग्धानाशिरीषपेलवं
तपोवनक्लेशसहं भविष्यति ॥ २३ ॥

कीर्ति—(आत्मगतम्) हद्धी धीलत्तणं हिअअस्स! जणप्पडिसिद्धप्पसरा वि पुणो पुणो तहिं एव्व दिट्ठी सज्जइ। (हा धिक् धीरत्वं हृदयस्य। जनप्रतिषिद्धप्रसरापि पुनः पुनस्तत्रैव दृष्टिः सज्जते।

चेटी—जेदु भट्टिदारिआ, सीसरइअअंजलिपुडो सिंहलओ विण्णवेदि—कप्पिदं आवासट्ठाणं, भअवदीए जोअसिद्धीए अभिप्पेदं एदं एव्व पवेसमुहुत्तअं ति। (जयतु भर्तृदारिका, शीर्षरचिताञ्जलिपुटः सिंहलको विज्ञापयति—कल्पितमावासस्थानम्, भगवत्या योगसिध्याभिप्रेतमेतदेव मुहूर्तकमिति).

कांचु—देवि, आपृच्छ्यतां महाभागः; गच्छामो वयम्।

कुमा—गम्यतां पुनर्दर्शनाय। न विस्मरणीयोऽयमनुषङ्गदृष्टो जनः।

कीर्ति—(कुमारं कटाक्षेणावलोकयन्ती सपरिवारा निष्क्रान्ता).

कुमा— गता प्रिया प्रस्तुतचित्तरागै-
रारेचितभ्रूललितैरपाङ्गैः ।
कर्षत्यसौ मानसमस्मदीयं
मयि स्वमात्मानमुतार्पयन्ती ॥ २४ ॥

कथमियमस्या मार्गलता गमनविघ्नमाचरति ?

परिवृत्तमुखी नरेन्द्रकन्या
विटपोत्कम्पितभङ्गुरोत्तरीया ।
स्तनयोरनयोर्नताङ्गयष्टिः
स्मरसर्वस्वसमुद्गयोर्भरेण ॥ २५ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कथमेषा वक्त्रामोदप्रसक्तं मधुकरयुवानं लीलारविन्देन निवारयन्ती हन्त ! अन्तर्हिता तरुसङ्कटे ।

याता नितम्बगुर्वी
　यावद्यावन्मृगेक्षणा दूरम् ।
विवितगात्रीवान्त-
　स्तावत्तावदवगाढा मे ॥ २६ ॥

(पर्युत्सुकस्तिष्ठति) (प्रविश्य विदूषकः)

विदू—मअधप्पच्चंतवासिणं सवरपुलिंदाणं कुंजरएण पुरुसो पेसिदो—जह भणइ अंअमंतगुत्तो तह होदव्वं ति । जाव चंडिआअदणजिण्णुज्जाणगदं वअस्सं उवसप्पामि । (मगधप्रत्यन्तवसिानां शबर (?) पुलिन्दानां कुञ्जरकेण पुरुषः प्रेषितः—यथा भणति आर्यमन्त्रगुप्तः तथा भवितव्यमिति । यावत् चण्डिकायतनजीर्णोद्यानगतं वयस्यमुपसर्पामि).

(उपेत्य) जेदु वअस्सो । (जयतु वयस्यः).

कुमा—(विदूषकं हस्ते गृहीत्वा) सखे वैखानस,

स्वप्नोपनता लक्ष्मीः
　प्राप्ता गन्धर्वनगररेखा या ।
प्रादुर्भूय नृपसुता
　भूयः सहसा तिरोभूता ॥ २७ ॥

विदू—का सा राअदारिआ णाम ? (का सा राजदारिका नाम ?)

कुमा—एवमिव ।

विदू—अविहा ! अंधस्सकूपपतणं संवुत्तम्, पुव्वं रज्जणासो तते इत्थिआतंतुणा (बंधणं) । (हा ! अन्धस्य कूपपतनं संवृत्तम्, पूर्वं राज्यनाशः ततः स्त्रीतन्तुना (बन्धनम्) ।

कुमा—वैखानस, मा भैवम्; इतस्तथा प्रस्थितायाः—

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अस्याः सखे क्षणमदृश्यत रोमराजी
स्रस्तेंऽशुके स्तनभरान्मृगलोचनायाः ।
मालेव षट्पदमयी भुवनानि जेतुं
मौर्वीकृता भगवता मकरध्वजेन ॥ २८ ॥

विदू—हीं ! ही ! पेक्ख पेक्ख, पुंफणिंमलो अअं ओदगरासी दीसइ । (ही ! ही ! पश्य पश्य, पुष्पनिर्मलोऽयमोदनराशिर्दृश्यते).

कुमा—(दृष्ट्वा) अयं तस्या लतावसक्तपतितः प्रभावर्षी मौक्तिकहारः । आनीयतां तावत् ।

विदू—साहु ! ण मौत्तिअआरो बभुक्खिदस्स मे ओदणरासी दीसइ । (गृहीत्वोपहरति) (साधु ! न मौक्तिकहारो बुभुक्षितस्यौदनराशिर्दृश्यते).

कुमा—(हारमादय)

प्रस्थानक्षणसम्भ्रममुक्तं मुक्तास्वरूपेण ।
परिवृत्तं पश्य सखे किं नु तया विस्मृतं हृदयम् ॥२९॥

विदू—भो वअस्स, अंमाणं कुंभीलाणं (किं भीळूणं ?) आकिण्णेण परकेरएण गहिदेण ? (भो वयस्य, अस्माकं कुम्भीराणामाकीर्णेन परकीयेन गृहीतेन ?)

कुमा—वयस्य, मामैवम् । अस्ति तावदस्माकममुना प्रयोजनम् । पश्य—

मन्दारपुष्पस्तवकाभिरामैः
सिन्दूरितो नायकरत्नभाभिः ।
श्रीविभ्रमाम्भोजमृणालकान्ति-
र्माङ्गल्यहेतोरयमस्तु हारः ॥ ३० ॥

(प्रविश्य चेटः)

चेटः—जेदु भट्टा, गहिदसंभाराम वाआमभूमौ वअस्सगणो पडिपालेदि । (जयतु भर्ता, गृहीतसमाराः स्म व्यायामभूमौ वयस्यगणः प्रतिपालयति ।)

विदू—उट्ठेदु उट्ठेदु भवं, कालो वाआमभूमिगमणस्स । (उत्तिष्ठतूत्तिष्ठतु, कालो व्यायामभूमिगमनस्य ।)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(सर्वे परिक्रमन्ति)

कुमा— तामेवानुगतं चेतो मुक्तमूलमिदं मम।
स्रोतोदैर्घ्यवशात्तोयं ह्रदस्येवावसीदति ॥ ३१ ॥

अपि च—

स्तनकलशघनोष्मणेव तप्तं
पृथुलनितम्बभरादिवावसन्नम्।
मम हृदयमधिष्ठितं मृगाक्ष्याः
स्फुरदधरप्रभयेव रक्तमासीत् ॥ ३२ ॥

(निष्क्रान्ताः सर्वे)

प्रथमोऽङ्कः

द्वितीयोऽङ्कः

(ततः प्रविशति मधुमञ्जरिका)

मधु—अंमो! पच्चासण्णो दाणिं कुसुमसरसिबिरसंणिवेससंणिभो महुमासो। जइ साहागोलंबा सिळीमुहसणाहा वंमहसिहिसंणिभा कुसुमगुच्छआ दीसंति असोअरुक्खाणं। हद्धि! वंमहसरदूमिअहिअआए भट्टिदारिआए पडिऊळदंस्सेणा महुमासो।

(अंहो! प्रत्यासन्न इदानीं कुसुमशरशिबिरसन्निवेशसन्निभो मधुमासः। यथाशाखाग्रावलम्बाः शिलीमुखसनाथा मन्मथशिखिसन्निभाः कुसुमगुच्छकाः दृश्यन्तेऽशोकवृक्षाणाम्। हा धिक्! मन्मथशरधूमितहृदयाया भर्तृदारिकायाः प्रतिकूलदर्शनो मधुमासः।

(प्रविश्य भामिनिका)

भामि— असंणिहिदाए मए ण जाणिदं तपोवणवासकिलेसकिलंतसरीराए करिसो

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

खु रत्तिगतो वुत्तंतो। (असंन्निहितया मया न ज्ञातं तपोवनवासक्लेशक्ला-न्तशरीरायाः कीदृशः खलु रात्रिगतो वृत्तान्तः।

मधु— एसा भामिणिआ हिओरत्तीए सह पुरोहिदेहिं देव्वोपहारं णिव्वत्तिअ चंडिआ-अअणादो पडिणिवुत्ता। एसा वि रहस्सरक्खिणीणं सहीणं मज्झे णिउणिआए गणिज्जइ। ता इमं वि विदितवुत्तंतं करोमि। (उपेत्य) अइ कुसलं सहीए? (एषा भामिनिका। हि ओरत्रीए? सह पुरोहितैर्देवोपहारं निर्वत्य चण्डिकाय-तनतः प्रतिनिवृत्ता। एषापि रहस्यरक्षिणीनां सखीनां मध्ये निपुणिकया गण्यते। तदिमामपि विदितवृत्तान्तां करोमि। (उपेत्य) अपि कुशलं सख्याः?)

भामि—अइ, कुदो अह्माणं कुसलावसरो तादिसं भट्टिदारिआए अणिणीदणिदाणं आतंकं चिंतअंतीणं? (अयि, कुतोऽस्माकं कुशलावसरस्तादृशं भर्तृदारिकाया अनिर्णीतनिदानमातङ्कं चिन्तयन्तीनाम्?)

मधु—जइ एव्वं, णिव्वुदा होहि, णिंणीदं से आदंकणिदाणं। (यद्येवम्, निर्वृता भव, निर्णीतमस्या आतङ्कनिदानम्।)

भामि—दिट्ठिआ पसंणा भअवदी विञ्झवासिणी। इमस्स सहआररुक्खस्स पच्छाये णिसंणिअ संलवामो।
(दिष्ट्या प्रसन्ना भगवती विन्ध्यवासिनी। एतस्य सहकारवृक्षस्य प्रच्छाये निषद्य सल्लपावः).

मधु—एव्वं होदु। (एवं भवतु) (उभे उपविशतः)

भामि— कहेहि! कहेहि! (कथय! कथय!).

मधु—सुणिअदु, हिओरत्तीए किंवि उक्कंठिदा विअ णिस्सेसणिवारिअपरिजणा णिउ-णिआमेत्तसहीजणा सअणिज्जं गदा भट्टिदारिआ। (श्रूयताम्, हिओरत्तीए(?) निःशेषनिवारितपरिजना निपुणिकामात्रसखीजना शयनीयं किमपि उत्कण्ठितेव गता भर्तृदारिका).

भामि—तदो तदो। (ततस्ततः).

मधु—तदो जाव अणंतरसअणिज्जं गदा ओसुत्ता णिउणिआ दाव उक्कंठिदाए संणिहिदेहिं अणिद्दाए णिव्विणोदाए कहंवि एक्कस्सं जोह्ना सद्दे पडंते

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वण्णएहिं एक्को वंमहजंमतराकिदी कुमारो आलिहिदो ताव पडिबुद्धाए णिउणिआए दिट्ठा कमलमुउळकोमलं सीसे अञ्जलिं गेह्णिअ 'अइ हिअ-अवल्लभ, णिग्घिणोसि'त्ति भणंती भट्टिदारिआ। पच्चा अह्माणं णिउणि-आए मंतिदं। (ततो यावदनन्तरशयनीयं गतावसुप्ता निपुणिका तावदुत्कण्ठि-तया अनिद्रया निर्विनोदया कथमपि ज्योत्स्नाश्लक्ष्णे पटान्ते सन्निहितैर्वर्णकै-रेको मन्मथजन्मान्तराकृतिः कुमार आलिखितः। तावत् प्रतिबुद्धया निपुणि-कया दृष्टा कमलमुकुलकोमलं शीर्षेऽञ्जलिं गृहीत्वा 'अयि हृदयवल्लभ, निर्घृ-णोऽसि' इति भणन्ती भट्टिदारिका। पश्चादस्माकं निपुणिकया मन्त्रितम्).

भामि—दिट्ठिआ एव्वं पभादं! पुढमं एव्व अह्माणं हिअअतुलिओ एसो अत्थो। को उण सो? अहवा को एत्थ विआरो? णं सो एव्व जो अंमेहिं चंडि-आअअणे दिट्ठो। (दिष्ट्यैवं प्रभातम्! प्रथममेवास्माकं हृदयतुलित एषोऽर्थः। कः पुनः सः? अथवा क एष विचारः? ननु स एव योऽस्माभिश्चण्डिकाय-तने दृष्टः).

मधु—अह इं। को अण्णो पुण्णमसचंदं मोत्तूण कुमुदिणीए हिअअवल्लभो? (अथ किम्। कोऽन्यः पौर्णमासचन्द्रं मुक्त्वा कुमुदिन्या हृदयवल्लभः?)

भामि—होदु, अब्भंतरं एव्व पविसामो। (निष्क्रान्ते).
(भवतु अभ्यन्तरमेव प्रविशावः).

प्रवेशकः.

(ततः प्रविशति विदूषकः)

विदू—(निःश्वस्य) दिढं ह्मि णिव्विण्णो इमस्स वयस्सस्स अदेसकालप्पुण्णुंमादव्वाहिं उवअरंतो। जोच्चिअ पुढमं हुदसेसेहिं सकारुचेच्चहिं भिक्खाहारेहिं संवड्ढिअ-सरीरो संवुत्तो सोच्चिअ अहं वि लहिअपरदुद्दिट्टी कडंगरीअअसव्वंमआरी अलद्धकज्जंतरप्पवेसो कडअप्पाहुणिओ विअ वंज्जिदसइदं विह्मिदव्वो इदो तदो आहिंडेमि। जइ णिमंतणकाले णिमंतिदेहिं बह्मणेहिं सह अब्भंतरं पविसामि तदो किं मए पडिवत्तव्वं? होदु, इमस्स लदामंडपस्स बाहिरपच्छाए मुहुत्तं विस्समिस्सं। (तथा करोति).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(निःश्वस्य) दृढमस्मि निर्विण्णोऽस्य वयस्यस्यादेशकालोत्पन्नोन्मादव्याधिमुपचरन्। य एव प्रथमं हुतशेषैः सकारुचित्रकैः (?) भिक्षाहारैः संवर्द्धितशरीरः संवृत्तः स एवाहमपि लघूकृतपरदुर्दृष्टिः कडङ्गरीयसब्रह्मचारी अलब्धकक्ष्यान्तरप्रवेशः कटकप्राघुणिक इव वर्जितशपितव्यत्र्वृंहितव्य इतस्तत. आहिण्डामि। यदि निमन्त्रणकाले निमन्त्रितैर्ब्राह्मणैः सहाभ्यन्तरं प्रविशामि ततः किं मया प्रतिपत्तव्यम्? भवतु, अस्य लतामण्टपस्य बाह्यप्रच्छाये मुहूर्तं विश्रमिष्यामि) (तथा करोति).

(ततः प्रविशति निपुणिका)

निपु—रत्तिप्पआअरकिलन्तसरीरा गहिदकुमुदिणिव्व दिवा णिद्दं गदा भट्टिदारिआ। जाव आवासगदां एव्व भअवदिं जोअसिद्धिं पेख्खामि। सा एव्व णो इमस्सिं संकटप्पवाहे संकमो भविस्सिदि। (परिक्रामति).
(रात्रिप्रजागरक्लान्तशरीरा गर्भितकुमुदिनीव दिवानिद्रां गता भर्तृदारिका। तावदावासगतामेव भगवतीं योगसिद्धिं प्रेक्षे। सैव न एतस्मिन् सङ्कटप्रवाहे सङ्क्रमो भविष्यति) (परिक्रामति).

(ततः प्रविशति परिव्राजिका)

परि— अप्याजवञ्चवसुखान्यवधीरयन्ती
खद्योतवैद्युतरुचिक्षणभङ्गुराणि।
कृष्टाहमीश्वरसुतागुणपाशबन्धै-
र्बद्धं कलेबरभरं पुनरुद्वहामि॥ १॥

भोः! तथाभूते स्वजनवृत्तान्ते निर्वेदप्रव्रजिताध्यायुषजीविनमात्मानं मन्यमाना देशाद्देशान्तरं परिसरन्ती यदृच्छया शूरसेनमथुरां प्राप्य तत्र च कीर्तिषेणमहिष्या राजन्वत्या साकमध्याससमावसनकृतसख्या प्रतिवसामि। तद्दुहितरि मदङ्गसंवर्द्धितायामपत्यस्नेहवती तपोवनाभिमुखीमप्येनामनुगतास्मि। यावदेनामनुरक्तपतिं कुलगामिनीं पश्यामि तावन् कुतो मे निःसङ्गता? कुतः—

आश्रयति माधवी चेदाश्रमसहकारपादपस्कन्धम्।
स्वार्थलीनां लभते निर्वृतिमारण्यको वर्गः॥ २॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सा पुनरमीषु दिवसेषु किञ्चिदकल्यरूपा लक्ष्यते । वक्ति च लोकः—

वनवासमिमं कथं सहेत सा पितुरुत्सङ्गसुखैधिता तथा ।
क्लममेष्यति यत्र नैष्ठिकस्तरुवल्कावरणोऽपि तापसः ॥ ३ ॥

अपि च—

क्षणक्षीणौ बाहू च्युतपतितकेयूरवलयौ
परिम्लानावस्थः श्वसनपवनैरोष्ठरुचकः ।
निवृत्तस्नानीयः शिरसिजकलापो वपुरभू-
दसूर्यम्पश्यायाः (सरस) निभृतं राजदुहितुः ॥ ४ ॥ इति ।

मम पुनरयं प्रतर्कः । तस्या हि—

जातं विभ्रमदृष्टिपातशबलं पाण्डु द्वयं गण्डयो-
र्गाढे यौवनसोष्मणी स्तनतटे गाढोऽपि चिन्ताज्वरः ।
अव्यक्तस्तनिमा स्वकान्त्युपचयादप्येवमालक्ष्यते
प्रभ्रष्टाभरणप्रदेशविषमेष्वङ्गेष्वनङ्गामयः ॥ ५ ॥

को नु खल्वेष नभसः श्येनचरणभ्रष्टो निपतितश्चित्रपटः ?

दृष्ट्वा नभस्तः शिखिबर्हभारशारोदरं चित्रपटं पतन्तम् ।
अनभ्रसंसर्गमभूतपूर्वमैन्द्रं धनुःखण्डमनुस्मरामि ॥ ६ ॥

भवतु, अभूमिस्पृष्टमेनं सम्भावयामि ।

(गृहीत्वा शिलातले समुपविश्य निर्वर्णयति).

निपु—एत्थ भअवदीए लदामंडपं । (प्रविष्टकेनावलोक्य) एस भअवदी एक्कं चित्तपडं पेल्वंती सिलाअले णिसण्णा । अहो ! एसो चित्तपडो जो एक्कंते णिसण्णाणं बहुएहिं आसाबंधेहिं सहीणं आमिसखंडलुद्धेण सेणेण आक्खित्तो । (अत्र भगवत्या लतामण्डपम् । (—) एषा भगवती एकं चित्रपटं प्रेक्षमाणा शिलातले निषण्णा । अहो ! एष चित्रपटो य एकान्ते निषण्णानां बहुभिराशाबन्धैः सखीनामामिषखण्डलुब्धेन श्येनेनाक्षिप्तः).

परि—महदिदमाकारबद्धं तेजः ! अस्य हि—

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

दर्पणगतमिव सवितुः पटान्तरार्चितं महानुभावस्य ।
प्रतिबिम्बमिव प्रतिमुखपतितं प्रतिहन्ति मे दृष्टिम् ॥ ७ ॥

(पुनः सावधानं दृष्ट्वा) हा ! महादेवि, (मोहं गता).

निपु—हद्धि ! चित्तपडं पेक्खंती हा ! महादेवि त्ति मोहं गदा भअवदी । महन्तेण उप्पादेण होदव्वं । (सहसोपसृत्य तामुत्सङ्गेनादाय) समस्ससिहि समस्ससिहि । (हा! धिक्, चित्रपटं प्रेक्षमाणा हा ! महादेवि इति मोहङ्गता भगवती । महतोत्पातेन भवितव्यम् । (——) समाश्वसिहि समाश्वसिहि ।

परि— (ईषदिव समाश्वस्य) हा ! महादेवि, तदा तुए पदिलोअं पत्थिदाए जो मम हत्थे णिक्खित्तो, जो पडिपक्खभयादो चलक्काकपक्खओ अवमहरेहिं अमच्चकुमारेहिं कल्लाणसिरी । (पुनरपि मूर्च्छिता) (हा ! महादेवि, तदा त्वया पतिलोकं प्रस्थितया यो मम हस्ते निक्षिप्तः, यः प्रतिपक्षभयाचलकाकपक्षः........ अमात्यकुमारैः कल्याणश्रीः) (—)

विदू—किं णु खु लआघरब्भंतरे सद्दो विअ? होदु, विडपंतरेण पेक्खामि । (तथा कृत्वा) वअस्सपडिकिदिं पेक्खंती एका परिव्वाजिआ मोहं गआ; तं पुण एका इत्थिआ उच्चंगे गेह्णिअ समस्सासं कुणइ । तक्केमि सा एसा विणअंधरेत्ति णिव्वेदपव्वाजिदा । (किं नु खलु लतागृहाभ्यन्तरे शब्द इव? भवतु, विटपान्तरेण प्रेक्षे । (—) वयस्यप्रतिकृतिं प्रेक्षमाणैका परिव्राजिका मोहं गता; तां पुनरेका स्त्री उत्सङ्गे गृहीत्वा समाश्वासं करोति । तर्कयामि सैषा, विनयन्धरेति निर्वेदप्रव्राजिता)

निपु—समस्ससिहि समस्ससिहि । (समाश्वसिहि समाश्वसिहि).

परि—(समाश्वस्य) जइ सो अविक्खदसरीरो एत्ताह एत्तिअं परिवड्ढिदो भवे । (—) (यदि सोऽविक्षतशरीरः एतावता एतावान् परिवर्द्धितो भवेत्).

निपु—(आत्मगतम्) अवि णाम भअवदीए स जणो भट्टिदारिआए हिअअवल्लवो जणो भवे? (प्रकाशम्) भअवदि, को एसो अब्भाआरिअजणजोग्गो आआसो? का एसा विण्णाणविसेसविसरिसी असक्कया वाणी? (—) अपि नाम भग-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वत्याः स्वजनो भर्तृदारिकाया हृदयवल्लभो जनो भवेत्? (--) भगवति क्व एषोऽभ्यागारिकजनयोग्य आयासः? कैषा विज्ञानविशेषविसदृशी असंस्कृता वाणी?)

परि--(प्रत्यवमृश्य) अये! निपुणिका। अयि निपुणिके,

निपु--(आत्म) मोहं पडिबुद्धाए इमाए सव्वं विण्णवेमि। (मोहं प्रतिबुद्धाया अस्याः सर्वं विज्ञापयामि। (प्रकाशम्) कहिं सो कुमारो कल्लाणसिरी? (कुत्र स कुमारः कल्याणश्रीः?)

परि--वाष्पान्धापि यदादरं दश दिशो दृष्टिः समुद्वीक्षते
स्थाविर्येऽपि परिस्नुतस्तनमुखं वक्षो यदुत्कण्ठते।
चिन्तातूलिकया मनोरथमये कुड्ये यदालिख्यते
प्रभ्रष्टं तदपत्यकं निपुणिके दग्धो विधिः पृच्छ्यताम्॥८॥

(पुनरपि चित्रपटं निरीक्ष्य).

यौ द्वौ शैशवमुष्टिभेदविशदौ रेखातपत्राङ्कितौ
क्षोणीचङ्क्रमणे मदङ्गुलिमुखं याभ्यां समालिङ्गितम्।
वन्द्ये यावपि कारितौ गुरुजने मात्रा बलादञ्जलिं
तौ हस्तावुरगेन्द्रभोगसदृशप्रौढप्रमाणौ कथम्॥९॥

(बाष्पं विकिरति)

निपु—(पत्रपुटेन गोत्रवारि गृहीत्वा) भअवदि, इदं मुहोदअं। (—) (भगवति, इदं मुखोदकम्)

परि--ईषदिव प्राप्तानृण्या बुद्धिः।

निपु—भअवदि, एदसरिसवण्णो कुमारो भट्टिदारिआए दिट्ठो। ता इयं आलिहिदा तस्स पडिकिदी। सहीजण हत्थादो आमिसखंडलुद्धेण सेणेण आक्खित्तो पुणो वि गअणा भअवदिहत्थं पत्तो जदिच्छाए अअं चित्तपडो। (भगवति, एतत्सदृशवर्णः कुमारो भर्तृदारिकया दृष्टः। तदियमालिखिता तस्य प्रतिकृतिः। सखीजनहस्तादामिषखण्डलुब्धेन श्येनेनाक्षिप्तः पुनरपि गगनाद्भगवतीहस्तं प्राप्तो यदृच्छयायं चित्रपटः).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

परि—एवं भोः! कथय, कथमेवं वर्णकारस्तया कुमारो दृष्टः।

निपु—एव्वं विअ। (एवमिव)

परि—अपि नाम तयायमालिखितः स एव मगधकुलाङ्कुरः कुमारो भवेत्। न तदाकारानुकारी कश्चिदेकः।

निपु—अच्चाहिदं एदं हि अअं अण्णं अणु भट्टिदारओ भअवदीए। (अत्याहितमेतद्धि। अयमन्यश्च ननु भर्तृदारको भगवत्याः?

परि—निपुणिके, कथयामि ते भूतार्थम्। आसीत् पुरा सुन्दरवर्मा नाम मगधेश्वरः। तस्याग्रमहिषी मदिरावती नाम। तस्या धात्रेयिका सखी कुमारधात्री च भूता दैवादन्तर्हिते तत्र राजकुले निर्वेदप्रव्रजिताहं मथुरां प्रविश्य प्रतिवसामि। सम्प्रति पुनः कीर्तिमती मे सर्वस्वम्।

विदू—ही! ही! एस ण्हातकोम्हि संवुत्तो; दुंमेदो वेखाणसो त्ति मंतगुत्तो मंतेदि। (ही! ही! एष स्नातकोऽस्मि संवृत्तः; दुर्मेधो वैखानस इति मन्त्रगुप्तो मन्त्रयति)।

परि—(आत्मगतम्) लब्ध इदानीमवसरः पृच्छामि तावदेनाम्। यत् कीर्तिमतीमन्तरेण तदखिलं निपुणिका वेत्ति।

(नेपथ्ये गीयते)

न शशाक शशाङ्कमीक्षितुं न समाकर्णयितुं सुखोदितम्।
न च पल्लवभङ्गकल्पिते शयनीये शयितुं नृपात्मजा ॥ १० ॥

परि—अहो! यावत् साधु गीतमेतयोर्वैतालिकयोर्वैतालिकीयम्। निपुणिके, कीर्तिमतीमन्तरेण किञ्चिदिह भवतीं पृच्छामि।

निपु—भअवदि, आणवेदु। (भगवति, आज्ञापयतु)

विदू—तक्केमि राअदारिआए एसा पच्चअं गदा सही। (तर्कयामि, राजदारिकाया प्रत्ययं गता सखी)।

परि— आकस्मिकीमरतिमुद्वहतीव तस्या
वक्त्रं कुतो वसुमतीपतिनन्दनायाः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

च्योतद्विलोचनजलाविलगण्डरेखं
नीहारनीरकणिकार्द्रमिवारविन्दम् ॥ ११ ॥

निपु—एसो भट्टिदारिआए चित्तगदो कुमारो पुच्छिदव्वो अभवदीए। सा दाणिं णीसाससजिण्णहिअआ कोमलकदलिआ विअ इदी तदो पलोट्टती मणोरहसहीजणं वि मुंचइ। जइ तं अंतरेण भअवदी ण साहु पेक्खिस्सदि, तदो सा अवस्सं तवस्सिणी सोअघरणिघरसिहररुदंसिणी भविस्सिदि (?) (एष भर्तृदारिकायाश्चित्तगतः कुमारः प्रष्टव्यो भगवत्या। सा इदानीं निःश्वासदीर्णहृदया कोमलकदलिकेव इतस्ततः प्रलुठन्ती मनोरथसखीजनमपि मुञ्चति। यदि तामन्तरेण भगवती न साधु प्रेक्षिष्यते, ततः सावश्यं तपस्विना शोकधरणिधरशिखरारूढा भविष्यति (?)

परि— सा राजपुत्री नयति त्रियामां
कान्तं विना जागरणारुणाक्षी।
मामेव मन्ये प्रतिपालयन्ती
प्रत्यूषवेलामिव चक्रवाकी ॥ १२ ॥

विदू—ही! ही! भिक्खं गदो णिमंतणिमंतणं पत्तो। (सहसोपसृत्य) एस वैखाणसो पणमदि। (ही! ही! भिक्षां गतो निमन्त्रनिमन्त्रणं प्राप्तः। (—) एष वैखानसः प्रणमति).

परि—अये! वैखानसः प्राप्तः का नामेयमनभ्रवृष्टिः?

निपु—(आत्मगतम्) को एसो आकिदीए मक्कडओ वाआए गद्दभो? (—) क एष अकृत्या मर्कटको वाचा गर्दभः?)

विदू—एसो कल्लाणसिरिणो णमुक्कारो। (अञ्जलिं गृह्णाति). (एष कल्याणश्रियो नमस्कारः। (—)

निपु—(अत्मगतम्) एस वअस्सो तस्स जणस्स। (—) (एष वयस्यस्तस्य जनस्य).

परि— सामन्ताग्रवधूकरव्यातिकरैः सञ्चारितो दर्पणः
सौधोत्सङ्गनिवेशितो नवशशी पौरैः समुद्वीक्षितः।
वद्धीभिः स्तनदायिनीभिरुचितस्कन्धः पुनर्मातृभिः
पुण्यः पुष्पपुरोत्सवः क्व नु गतो वैखानस ब्रूहि मे ॥ १३ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विदू--आसण्णं दे पुत्तदंसणम्। अणुवअस्सं राअदारिआ संतप्पदि, राअदारिआदंसणुप्पण्णमदणुंमादो बहुलपक्खचंदस्स अणुदिणुसंओमीरंतसरीरो वअस्सो दीसइ। (आसन्नं ते पुत्रदर्शनम्। अनुवयस्यं राजदारिका सन्तप्यति, राजदारिकादर्शनोत्पन्नमदनोन्मादो बहुलपक्ष......................शरीरो वयस्यो दृश्यते).

परि--साधु भोः--

कुवलयदलदीर्घदृष्टिपाशां कुसुमशरासनवागुरां कुमारः।
नृपदुहितृमयीं निरुद्धवर्त्मा मृगपतिपोतसमः समाजिहीते ॥१४॥

निपु--उस्ससिदं विअ मे हिअअं। किं णु हु सव्वं भवे? (उच्छ्वसितमिव मे हृदयम्। किं नु खलु सर्वं भवेत्?)

परि--वत्स, यावदविदितमेतदस्माभिः। केयमतर्किता दृष्टिवृद्धिः?

विदू--एवं विअ। (एवमिव).

परि--एवमेतत्। प्रयोजनवादिव मे जीवितधारणम्।

विदू--भोदि, राअदारिआए वअस्सपडिकिदी आलिहिदा, तुए वि मज्झ पडिकिदी आलिहिदव्वा। (भवति, राजदारिकया वयस्यप्रतिकृतिरालिखिता, त्वयापि मम प्रतिकृतिरालिखितव्या).

परि--(सस्मितम्) भजमानमभिहितम्।

निपु--ध्वंसवडरवडुअ। (ध्वंसवडर (?) वटुक).

विदू--होदि, मा कुप्पहि एसो तुह्मे पसादेमि। (उत्तरीयादुन्मुच्य हारमर्पयति). (भवति, मा कुप्य, एष युष्मान् प्रसादयामि) (--)

निपु--हं! एसो सो हारो जो भट्टिदारिआए पणट्ठो। (हारमञ्जलिना गृह्णाति) (हं! एष स हारः, यो भर्तृदारिकायाः प्रणष्टः) (--)

परि--(आत्मगतम्) उभावपि मदुत्सङ्गसंवर्द्धितौ परस्परं कामातुरौ कीर्तिमती कल्याणवर्मा च। तदनयोर्वागर्थयोरिव समवायं करिष्यामि। (प्रकाशम्) ममायमभिसन्धिः। (धातुरागेण पटान्ते समालिख्य वाचयति).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

शौनकमिव बन्धुमती कुमारमविमारकं कुरङ्गीव ।
अर्हति कीर्तिमतीयं कान्तं कल्याणवर्माणम् ॥ १५ ॥

गूढरक्षितमेनं कुमाराय समर्पय प्रदोषे । पुनरात्मा दर्शयितव्यः । (चित्रपटमर्पयति).

विदू—जं भअवदी आणवेदि (यद्भगवत्याज्ञापयति) (चित्रपटं गृहीत्वा निष्क्रान्तः).

निपु—भअवदि, कहं भट्टिदारिआए पाणा रक्खिदव्वा ? (भगवति, कथं भर्तृदारिकायः प्राणा रक्षितव्याः ?)

परि—मामूत्ते विषादः । पश्य—

गूढप्रयोगनिभृतापि समर्पयन्ती (प्रियमर्पयन्ती ?)
चिन्ताज्वरं व्यपनयामि नृपात्मजायाः ।
पर्जन्यघोषविमुखीव दिवः पतन्ती
भूमेरवग्रहविशोषमनभ्रवृष्टिः ॥ १६ ॥

(इति निष्क्रान्ताः सर्वे)

द्वितीयोऽङ्कः

तृतीयोऽङ्कः

(ततः प्रविशति कामयमानावस्थः कुमारः)

कुमा—अचिन्तनीयं मनसापि लब्धुमज्ञातभावं जनमन्तरेण ।
मय्येवमाकस्मिकमत्सरोऽसौ मनोभवः किं नु फलं वहेत ॥ १ ॥

(मदनबाधां निरूप्य) भोः कष्टं ! यौवनमध्यंदिनप्रकटितमिथ्यामनोरथमृगतृष्णिकाविषमेषु विषयमरुषु भ्राम्यतः कामुकजनपाथिकसार्थस्य सन्तापमुत्पादयत्यनन्नजन्मपतङ्गः । कुतः—

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

यदेष कवलीभूतो हरकोपानलत्विषाम् ।
दाहात्मा दृश्यते तेन नूनं मकरकेतनः ॥ २ ॥

धिग्भोः पराश्रयेण बलवत्तरमात्मानं मन्यते मदनः । कुतः—

उन्निद्राशोकचूतप्रसवपरिमलोद्गन्धयो गन्धवाहाः
प्रेङ्खद्बालाकमालाशतशबलमुखः प्रावृषेण्योऽन्धकारः ।
सौधोत्सङ्गप्रसङ्गी नवशशिविशदः शारदो वा प्रदोषो
यद्यस्त्वं न स्युरेते स्वयमतनुरसौ कातरः किं करोमि ॥ ३ ॥

अपि नाम पुनरपि सा दृश्येत ? भोः कष्टं! सर्वः स्वकार्यैकृपणो जीवलोकः । कुतः—

उपकृतवतीमपि दृशं रूपामृतसंविभागेन ।
वञ्चयति स्मरणसुखे तस्या हतहृदयमेतन्मे ॥ ४ ॥

क नु खलु जीवितसर्वस्वभूतस्या मौक्तिकहारः । आः! यदि नाम कदाचित्तस्या राजदुहितुः सखीजनो दृश्येत परिजनो वा—इत्यमुना मनोरथेन निर्गतो वयस्यो वैखानसः, तस्य हस्ते हारः । केनेदानीमुपष्टम्भेनावसीदन्तमात्मानमवलम्बिष्ये ? भवतु, प्रियादर्शनमुहूर्तभाजनीभूतं तदेव जीर्णोद्यानं गत्वा पर्युत्सुकमात्मानं विनोदयामि ।

(ततः प्रविशति विदूषकः)

विदू—(परिक्रम्यावलोक्य) एसो सावमुत्तविण्णात्तिविण्णाणो धरणिपडिओ विअ विज्जाहरदारओ सोअणीअदस्सणीयाकिदी वअस्सो दीसइ । (उपेत्य) जेदु वअस्सो । अविहा! ण त्थि मे पडिवअणं । केवलं चिंताणिमीलिअलोअणो उंमीलिओविअ आलेख्वजोख्वे लख्विअदि । एव्वं दाव भणिस्सं! राअदारअ, किं राअसिरी चिंतीअदि ? (—) (एष शापमुक्तविज्ञप्तिविज्ञानो धरणिपतित इव विद्याधरदारकः शोचनीयदर्शनीयाकृतिर्वयस्यो दृश्यते । (—) जयतु वयस्यः। अविहा! नास्ति मे प्रतिवचनम् । केवलं चिन्तानिमीलितलोचन उन्मीलित इवालेख्यजोक्षो लक्ष्यते । एवं तावद्भणामि । राजदारक, किं राजश्रीश्चिन्त्यते ?)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कुमा—(उन्मीस्यावलोक्य) अये! वयस्यो वैखानसः। वयस्य, एवमेतत्, किं तु—

रत्नोल्लासितमस्तकै रणगतैस्तेजस्विभिर्भोगिभि-
र्देवे प्रादुरभूत् प्रचेतसि विभौ या वाहिनीभर्तरि।
या साक्षात् पुरुषोत्तमप्रणयिनी नान्यं वृणीते पतिं
राजश्रीरिव मृग्यते हृदि सदा सा राजपुत्री च मे ॥ ५॥

वयस्य, सावशेषतुषारत्वान्मधुमासादिवसमुखानां शैलेयगन्धिनि शिलातलेऽस्मिन् मुहूर्तमासिष्यावहे।

विदू—जं भट्टिवअस्सो अणवेदि। (यद्भर्तृवयस्य आज्ञापयति).

(उभावुपविशतः)

कुमा—कान्तापयोधरसंसर्गश्लाघनीयो मौक्तिकहारस्तावदनीयताम्।

विदू—अविहा! कहिं हारो पणट्ठो? (अविहा! कुत्र हारः प्रणष्टः?)

कुमा—धिङ्मूर्ख,

विदू—ही! ही! होदु होदु मुक्खो वैखाणसो अपंडितो वैखाणसो त्ति। मम दाव वअणं सुणाहि, पच्चा मं उवालभेहि। इदो अहं राअदारिआकेरअमोत्तिअहारं अण्णेसंतीए विअ राअदारिआ हिअअणिव्विसेसाए णिवुणिआए दिट्ठो म्हि। (ही! ही! भवतु भवतु मूर्खो वैखानसः, अपण्डितो वैखानस इति। मम तावद्वचनं शृणु, पश्चान्मामुपालभस्व। इतोऽहं राजदारकीयमौक्तिकहारमन्विष्यन्त्येव राजदारिकाहृदयनिर्विशेषया निपुणिकया दृष्टोऽस्मि).

कुमा—(सकुतूहलम्) किमसि निपुणिकया दृष्टः? ततस्ततः।

विदू—किं तदो तदोत्ति? रूपाभिगहिदस्स कुंभीलस्स का पडिपत्ती। (किं ततस्तत इति? रूपाभिगृहीतस्य कुम्भीलस्य का प्रतिपत्तिः).

कुमा—मुक्तः परिहासः, विस्पष्टमभिधीयताम्।

विदू—एव्वं विअ। (चित्रपटं दर्शयित्वा) पेख्वदु पेख्वदु तुह्म पडिकिदिं विंगख्विणं (?) तत्तहोदीए चित्तं। (एवमिव। (—) प्रेक्षतां प्रेक्षतां तव प्रतिकृतिं......... तत्र भवत्याश्चित्रम्).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कुमा—अपि सत्यमिदम्? को नाम पुरुषः श्रद्दध्यादेवंभूतमभ्युदयविशेषम्? तथा बलात् प्रह्लादते मे हृदयम्। पश्य—

सम्प्रत्यहं प्रणयिनीबहुमानपात्रं
प्रोद्भिन्नरोमपुलकोपहितं शरीरम्।
सिन्दूरचूर्णरचनारमणीयकुम्भ-
नीराजितं नृपकरीव समुद्वहामि ॥ ६ ॥

अपि च—

वामो गन्धवहः पुरा पुनरसौ वासन्तिको दक्षिणः
प्रारम्भे कुलिशं प्रसूनधनुषः पश्चात्तु बाष्पाः शराः।
यामिन्यामपनीतवाह्निकाणिकाः पीयूषनिष्यन्दिन-
श्च्योतच्चन्द्रमरीचयोऽपि नियतं निर्वापयिष्यन्ति नः ॥ ७ ॥

(सावधानं चित्रपटं निर्वर्णयति)

विदू—किं तुए तत्तहोदीए सिप्पविण्णाणं, आदु अत्तणो आकिदिसोहा णिव्वण्णीअदि? (किं त्वया तत्रभवत्याः शिल्पविज्ञानम्, उतात्मन आकृतिशोभा निर्वर्ण्यते?)

कुमा—नन्विदमेव चित्रकर्म कान्तायाः शिल्पगतं विज्ञानविशेषमस्मद्गतं प्रेम च प्रकटयति। कुतः—

प्रेम्णि स्थितेऽपि तस्याः सम्मुखलज्जाहृते समाधाने।
मत्प्रतिकृतिरचनायामासीदन्ते विसंवादः ॥ ८ ॥

विदू—भो वअस्स, तुह तत्तहोदीए अ दोण्णं वि तुह्माण कदरस्स सविसेसं सिप्पविण्णाणं ति महंतो मे संदेहो। ता इमेहिं विंज्झसिहरोज्झरसंणिहिदेहिं दाउराअवंणएहिं पडंते विरएहि तत्तहोदीए पडिकिदिं। (भो वयस्य तव तत्रभवत्याश्च द्वयोरपि युवयोः कतरस्य सविशेषं शिल्पविज्ञानमिति महान्मे सन्देहः। तदेभिर्विन्ध्याशिलोच्चयसंनिहितैर्धातुरागवर्णकैः पटान्ते विरचय तत्रभवत्याः प्रतिकृतिम्)।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कुमा—सखे, ममाप्ययमेवाभिप्रायः, किं तु—

भवति निर्वृतये यदि लिख्यते कुसमकेतुविकारवती प्रिया ।
स्मरकृशेत्यमुना तु समाधिना ग्लपयितुं दयितां बत नोत्सहे ॥९॥

विदू—(चित्रपटं विस्तारयति).

कुमा—(दृष्ट्वा 'शौनकम्' इत्यादि वाचयित्वा) कस्येयमक्षरपङ्क्तिः ?

विदू—भअवदीए जोअसिद्धीए । (भगवत्या योगसिध्याः).

कुमा—अहो! मां प्रति निष्कारणवत्सला भगवती ।

विदू—(आत्मगतम्) दाणिं परमत्थदो जोअसिद्धिं णिवेदेमि । (प्रकाशम्) ण खु सा णिक्कारणवच्छला । (—) (इदानीं परमार्थतो योगसिद्धिं निवेदयामि । (—) न खलु सा निष्कारणवत्सला).

कुमा—कथमिव ?

विदू—एव्वं विअ । (एवमिव).

कुमा—(सकुतूहलम्) कथं ममैव निर्वेदप्रव्रजिता धात्री !

....

परलोकात्पुनरागतेति मन्ये ।
अपि नाम विलोकयेयमाभ्यां
जनयित्रीमधुना विलोचनाभ्याम् ॥

(बाष्पं विकिरति).

विदू—धारेदु धारेदु भवं । अदिक्कंदो सो जंमंतरभूदो कालो । (धारयतु धारयतु भवान् । अतिक्रान्तः स जन्मान्तरभूतः कालः).

कुमा—अत एव कथञ्चिदात्मा धार्यते ।

विदू—(पुनरपि चित्रपटं विस्तार्य) आलिहदु । (आलिखतु).

कुमा—(कीर्तिमतीप्रतिकृतिमालिखति).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(प्रविश्य नन्दकः)

नन्द—जेदु भट्टा, ह्णाणवेला संपत्ता । (जयतु भर्ता, स्नानवेला संप्राप्ता).

विदू—अविहा! मम सरीरादो णिरुवंतेण बुबुख्वासंदोहेण विअ अच्चासंणो मज्झह्णो। (उत्थाय) उट्ठेदु उट्ठेदु भवं । (अविहा! मम शरीरान्निष्क्रान्तेन बुभुक्षासन्दोहेनेवात्यासन्नो मध्याह्नः । (—) उत्तिष्ठतु उत्तिष्ठतु भवान्).

कुमा—(विदूषकहस्ते चित्रपटं दत्त्वा परिक्रम्य) अये! दण्डकरुचिरिव नृपतिः परितपति परमशीतकिरण । कुतः—

प्रश्च्योतत्करशीकरेण करिणा संस्पृश्यते वाशिका
स्कन्धे चन्दनशाखिनः फणिपतिर्वेष्टान्तरं चेष्टते ।
ध्यानस्थानजुषो मुनेः परिचयादुत्सङ्गशय्यातलं
प्रारब्धप्रचलाहतो मृगशिशुर्निद्रालुरालीयते ॥ १० ॥

(निष्क्रान्ताः सर्वे)

तृतीयोऽङ्कः

चतुर्थोऽङ्कः

(ततः प्रविशति कौम्भकूणविकवेषो वर्द्धमानकः)

वर्द्ध—(कुम्भकूणवं वादयित्वा गायति)

अलिअं रामसरवलं गुहकहाहिकुञ्चगिरिविवरम् ।
तुज्झ विणाअअ मंणे पल्लवरिणए रदणवहो ॥
(अलिकं रामशरवलं गुहकथापि क्रौञ्चगिरिविवरा ।
तव विनायक मन्ये........रदनमथः........ ॥ १ ॥)

(पुनरपि गायति)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वहमाणो रेवइमुहमहुमअणिव्वत्तिअं उदअराअं ।
सामळवसणकळंको सोहइ चंदव्व बळभद्दो ॥
(वहन् रेवतीमुखमधुमदनिर्वर्तितमुदयरागम् ।
श्यामलवसनकलङ्को शोभते चन्द्र इव बलभद्रः ॥ २ ॥)

(परिक्रम्य) आणत्तोह्मि अंअमंतगुत्तेण–गच्छ सोम, सूलपाणिसिद्धाअअणं । तहिं गहिदपासुपदवेसं अंअरक्खिदं भणाहि—"मम समीवं आअच्छदु"त्ति । (परिक्रम्यावलोक्य) एदं शूलपाणिसिद्धाअअणं । एदे खु घणेहिं अप्पिदाणं उवहाविसुद्धाणं गहिदवेसंतरं अणुट्ठाणगदाणं अह्मि सुभडाणं एके दीसंति । (अज्ञप्तोऽस्मि आर्यमन्त्रगुप्तेन–गच्छ सोम्य शूलपाणिसिद्धायतनम् । तत्र गृहीतपाशुपतवेषमार्यरक्षितं भण–'मम समीपमागच्छतु' इति । (·—)एतच्छूलपाणिसिद्धायतनम् ।) एते खलु धनैरर्चितानामुपधाविशुद्धानां गृहीतवेषान्तरानुष्ठानगतानामस्माकं स्थानगतानां सुभटानामेके दृश्यन्ते ।)

(नेपथ्ये) नमोऽस्तु ते शशाङ्कशेखराय शम्भवे ।

वर्द्ध—(कर्णं दत्त्वा) एसो खु सो भअवसिवभट्टारअपादवंदणव्वावुदस्स अंअस्स सरओ सुणीअदि । होदु । से संकेदलक्खणस्ससिरिरुक्खस्स पच्छाये पडिवालेमि । (परिक्रामति) (एष खलु भगवच्छिवभट्टारकपादवन्दनव्यापृतस्यार्यस्य स्वरः श्रूयते । भवतु, अस्य सङ्केतलक्षणस्य श्रीवृक्षस्य प्रच्छाये प्रतिपालयामि ।).

(ततः प्रविशति पाशुपतवेष आर्यरक्षितः)

आर्य—नमोऽस्तु ते शशाङ्कशेखराय शम्भवे ।

कण्ठे विषं विकटवेष करे करोटि-
मंसे गजाजिनमुरस्युरगं करोषि ।
कर्णे करोषि वरुणालयसारगर्भं
लाटीललाटतटसुन्दरमिन्दुखण्डम् ॥ ३ ॥

अपि चेयं जन्मनः प्रभृत्यनपायिनी मे प्रार्थना—

इच्छानुषङ्गकलुषाल्पधियां त्वदीय-
दिव्यस्वरूपसहजाध्यविलोचनानाम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

त्वत्पादयोः स्फुरतु भक्तिरकृत्रिमेयं
जात्यन्तरेऽपि जननीस्तनपायिनां नः ॥ ४ ॥

(सप्रदक्षिणं नमस्कारं कृत्वा परिक्रम्य)

मुहूर्तं तावदितः प्राकारमुत्तरेण श्रीवृक्षच्छायामुपसेविष्ये, यत्र मां कार्यवन्तो मन्त्रगुप्तपुरुषाः प्रतिपालयन्ति । (तथा करोति).

वर्द्ध—(उपेत्य) अंअ, वंदामि । (आर्य, वन्दे).

आर्य—अये! वर्द्धमानकः । वर्द्धमानक, अपि जानीषे कुञ्जरकानुवर्तिषु कुपितेषु प्रत्यन्तपालेषु तत्प्रातिचिकीर्षया ससैन्ये नगरान्निर्गते चण्डसेनहतके संप्रति स्वामिप्रत्यानयनार्थमात्ययिकदूतो हरिणाश्वः प्रषितो ननु मन्त्रगुप्तेन ।

वर्द्ध—पेसिदो त्ति एत्तअं मए जाणिदं, ण खु से अभिप्पाओ । (प्रेषित इत्येतावन्मया ज्ञातम्, न खल्वस्याभिप्रायः).

आर्य—अहो! साधु मन्त्रगुप्त, साधु, यदयमुपधाविशुद्धो गर्भदासः परिपार्श्ववर्त्यपि विक्रियासु न तेऽभिप्रायमधिगच्छति । कुतः किल ते मन्त्रदोषावसरः? अथवा तुल्यरूपमुभयोरपि धर्मार्थकामयोरनुशासनम् । कुतः—

कुर्वन्ति भृत्या वचनं प्रभूणां
प्रयोजनोद्देशमलक्षयन्तः ।
श्रुत्यर्थमार्याः फलमस्तु मा वा
स्वधर्म इत्येव समाचरन्ति ॥ ५ ॥

वर्द्ध—अंअ, दाणिं (जइ) आअच्छादि सामी णिव्विआरो णं रज्जलाभो । (आर्य, इदानीं (यदि) आगच्छति स्वामी निर्विकारो ननु राज्यलाभः).

आर्य—कः सन्देहः? पश्य—पूर्वसंनिविष्टैः सागरदत्तप्रभृतिभिः स्थविरामात्यैः संभूय मन्त्रगुप्तेन देवस्य सुन्दरवर्मणस्तेषां सुकृतानामनुस्मारिता रहसि पौरजानपदाः । यदि सांप्रतमेष्यति स्वामी शत्रोरेकलोष्टबधमप्याचरिष्यन्ति; किमङ्गः पुनः स्वामिपादोपसङ्ग्रहणम् ।

वर्द्ध—केण कारणेण विरत्ता पकिदिए चंडसेणहदअस्स? (केन कारणेन विरक्ताः प्रकृतयश्चण्डसेनहतकस्य?)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

आर्य—तेनैव शीलपराधेन। पश्य—

कारानिरोधपरिपाण्डुकपोलरेखा-
कारा निरोधविधुराः प्रकृतीश्चकार।
कारक्षणेन ककुभो वशमानिनाय
कारस्करः स खलु सम्प्रति पार्थिवेषु ॥ ६ ॥

वर्द्ध—तदो तदो कहिं एरिसवंणस्स से राअसिरी? (ततस्ततः कुत्रेदृशवर्णस्यास्य राजश्री?)

आर्य—विस्तृतेयं कथा। समासतस्तु कथयामि—पुरा किल सुन्दरवर्मणा स्वयमविदितस्वभावतया विषतरुरिव पुत्रीकृतश्चण्डसेनहतकः।

वर्द्ध—तदो तदो। (ततस्ततः).

आर्य—ततः स्वयं मगधकुलं व्यपदिशन्नपि मगधकुलवैरिभिर्म्लेच्छैर्लिच्छविभिः सहसम्बन्धं कृत्वा लब्धावसरः कुसुमपुरमुपरुद्धवान्।

वर्द्ध—तदो तदो। (ततस्ततः).

आर्य—ततः संप्रवृत्ते संग्रामे वधपात्रमप्येनं पुत्रीकृतत्वादपहस्तयित्वा लिच्छविकुलमन्तः क्षपितवान् देवः। स हि—

स्वशक्तितः कृतसमरोत्सवो द्विषो
भयादिव त्रिदिवमितः प्रपेदिरे।
प्रमत्सरस्तदनु च दीप्तविग्रहो
दिवं गतः स्वयमपि तत्र मागधः ॥ ७ ॥

वर्द्ध—हद्धि! असरिससंगामे उप्पण्णो मित्तू तारिसस्स वि देवस्स! (हा! धिक् असदृशसंग्रामे उत्पन्नो मृत्युस्तादृशस्यापि देवस्य!).

आर्य—एवमेतत्, जरया नाम किल व्याधेन भगवानपि पुण्डरीकाक्षो लोकान्तरमुपनीतः।

वर्द्ध—उप्पण्णावसरं दाणिं पुच्छामि—कहं सामिसहिदाणं तुह्माणं तवोवणवासो? (उत्पन्नावसरमिदानीं पृच्छामि—कथं स्वामिसहितानां युष्माकं तपोवनवासः?)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

आर्य—एतदपि श्रूयताम्—ततोऽस्माकं जनयितारः स्वामिना सह स्वर्लोकमारूढाः। मातरोऽपि महादेवीभिः सह भगवन्तमाशुशुक्षणिमाश्रिताः। वयमप्यधर्मवरेण स्वामिना समानवयस्कया विनयन्धरया नाम धात्र्या प्रच्छन्नमेव रजन्यामटवीकान्तारमुपनीय वनगजबृंहितत्रस्तया सद्यो विप्रणाशिताः। पुनरपि यदृच्छयागतैस्तापसैर्नीतास्तपोवनमिति पर्यवसिता कथा।

वर्द्ध—एव्वं एव्व अय्य पेक्खिदुकामो अय्यमंतगुत्तो। (एवमेव आर्यं प्रेक्षितुकाम आर्यमन्त्रगुप्तः).

आर्य—गच्छतु भवान्, अहमप्यपराह्णे भिक्षाटनच्छद्मना गत्वा रथकारवेश्मगतं तत्रभवन्तं द्रक्ष्यामि।

(निष्क्रान्तौ)

मिश्रविष्कम्भकः

(ततः प्रविशति सखड्गः सोष्णीषो मन्त्रगुप्तः)

मन्त्र—साधु भोः, मम खलु तावत् स्वामिकार्यपर्याकुलहृदयत्वादविदितनक्तन्दिनविशेषो गतः कालः। सम्प्रति पुनः—

गुणविप्लवशङ्किधिया नीतिः समुपनतसाहसावसरा।
भृशतरमाकुलयति मारिषमिव रङ्गोन्मुखी वाक्छ्रीः ॥ ८ ॥

(विलोक्य) अये! पर्यवसितो दिवसः। अहो तु खलु! नित्यप्रमुदितनरनारीसहस्रसङ्कुलस्य कुसुमपुरस्य सायन्तनी श्रीः। इह हि—

त्यक्तो मानस्तरुण्या प्रणयकुपितया किं फलं शष्कुलीभिः
सैरन्ध्रीप्राप्तवेषा स्मितरुचिरमुखी स्वैरमास्ते पुरन्ध्री।
स्नाताः स्नानीयचूर्णग्रहणसुरभयः सुभ्रुवो बभ्रुवर्णाः
शारीकुर्वन्ति सन्ध्यां प्रचलकुवलयाक्षेपनीलैः कटाक्षैः ॥ ९ ॥

अपि च—

आशाकेशान्तधूपैरिव गगनतलं व्याप्तमासीत्तमोभि-
धूमव्याजेन दीपाः तिमिरमिव मुहुः पीतमेते वमन्ति।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

किञ्चान्यत् प्रस्थितानां प्रियतमवसतिं नक्तमेकाकिनीनां
श्रूयन्ते राजमार्गे कलकलमुखरा मेखलाः सुन्दरीणाम् ॥१०॥

अस्यां किल रजन्यामेष्यति स्वामी । साधु भोः—

भूत्वा प्रच्छन्नमन्तर्बहिरपि च मया मण्डलं साधयित्वा
निःशेषं नीतिमार्गप्रणिहितमनसा वञ्चितश्चण्डसेनः ।
स्वामी कुर्यात् प्रतापं निकृतिमति रिपौ विप्रलम्भो न दोषो
मायामोहेन दैत्येष्वपथमुपगतेष्वाददे वज्रमिन्द्रः ॥ ११ ॥

(ततः प्रविशति सान्नाहिकवेषः सखड्गो वीरसेनः)

वीर—प्राप्तोऽस्मि चिरादहमिदानीं कुसुमपुरम् । (निःश्वस्य)

कालापकर्षे सति भङ्गुरत्वात्
प्रक्षीणसंस्कारभुवां स्मृतीनाम् ।
स्फुरन्ति मे शैशवचेष्टितानि
जातिस्मरस्येव भवान्तराणि ॥ १२ ॥

(परिक्रम्य) अहो नु खलु टङ्कच्छेदैरन्धकारपटलैर्निरन्तरनिचितानीव दिगन्तराणि । तथा हि—

बिभर्ति रथ्या रणधूलिधूम्रं
वान्तं विघट्टाभिरिवान्धकारम् ।
तिर्यक्प्रवृत्तं नगनिम्नगाभ्यः
कलिन्दकन्येव पयःप्रवाहम् ॥ १३ ॥

भवतु, बाल्याभ्यस्तेन वर्त्मना रथकारवेश्मगतं तत्रभवन्तं मन्त्रगुप्तं पश्यामि । (परिक्रम्य) इदं तद्रथकारभवनम् । हन्त! अङ्गुलिस्फोटेन संज्ञामवघाट्य । निष्क्रान्तः ।

वीर—(उपेत्य) वर्द्धतां वर्द्धतां भवान् ।

मन्त्र—(सकुतूहलम्) अये! वीरसेनः । (करं करेणावलम्ब्य) उपविशतु भवान् । (शयनार्द्धं दर्शयति).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वीर—(भूमावुपविशति).

मन्त्र—क्वेदानीं वर्तते स्वामी ?

वीर—मार्गे ।

मन्त्र—अप्यस्यामेवरजन्यां कुसुमपुरमेष्यति स्वामी ?

वीर—अर्य, प्रभाते ।

मन्त्र—एवं भोः । अथ कियानिव परिपार्श्ववर्ती सेनावयवः ?

वीर—शतमात्रन्दाशेरकबलम् । नन्दकप्रभृतयो दौवारिकाः । येऽपि त्वया सह कुसुमपुरमप्राप्तास्तेऽपि । समवयसोऽपि । सकलवल्लसन्दोहसनाथः कुञ्जरकसेनापतिः ।

मन्त्र—साधु कुञ्जरक साधु,

सुहृदामनपायि सौहृदं
विजयत्वेऽपि कुलक्रमागतम् ।
ननु दाशरथिप्रयोजने
प्रियमायुः क्षपितं जटायुषा ॥ १४ ॥

अथ प्रतिनिवृत्तायां (राजदुहितरि) विरहातुरः स्वामी कथमिव सन्नाहं प्रतिपद्येत ?

वीर—यदहरेव प्रतिनिवृत्ता सा राजदारिका तदहरेव त्वत्सकाशादात्ययिकदूतो हरिणाश्वः प्रादृश्यत ।

मन्त्र—ततस्ततः ।

वीर—चिरप्रधारितलब्धावसरविजृम्भमाणरोषामर्षवशवर्तितः क्षणप्रणष्टकान्तावियोगज्वरःप्रतिपक्षमुपेक्षमाणः सन्नाहमेव प्रत्यपद्यत स्वामी ।

मन्त्र—सदृशमिदं क्षात्रस्य तेजसः । पश्य—

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

त्यक्तं तया कुपितवह्निपरीतमन्त-
र्द्धाम स्वमेव हृदयं नरदेवसूनोः ।
मध्यन्दिनार्ककिरणोष्णमपाकरोति
किं वारि पद्मसरसोऽपि न राजहंसी ॥ १५ ॥

अथ न कदाचिदपि सा नः स्वामिनः स्मृतिपथमागता ?

वीर—अथ कदाचित् पथि परिणमति पश्चिमाशावलम्बिनि सूर्यबिम्बे परिवृत्तासु तरुच्छायासु मन्दमन्दसञ्चारिणि सायन्तने नभस्वति वैखानसोत्सङ्गनिवेशितोत्तमाङ्गो मदङ्कविन्यस्तपदारविन्दः पल्लवशयनगतः स्वामी तां देवीमनुस्मृत्य बहु-प्रलपितवान् सः—

इति कृतमिति चोक्तं चेष्टितान्येवमास-
न्निति नियतमवाप्ता मामनुस्मृत्य शोकम् ।
विरहमसहमाना चक्रवाकीव बाला
नयनसलिलधारादुर्दिनासु क्षपासु ॥ १६ ॥

इत्येवमादि ।

मन्त्र—राजशासनात् प्रतिनिवृत्तायां राजदारिकायां कीदृशेन सन्देशेन स्वामिनमाप्याय्य प्रस्थिता योगसिद्धिः ?

वीर—'पूर्वमपि मदायत्तोऽयमर्थः, पश्चादप्येवमेव' इत्येतावत्तैव । अतः परमिह भवानेव प्रमाणम् ।

मन्त्र—मयापि पुरोहितसूनुरार्यरक्षितो मथुरां प्रेषितः—यदाह भगवती योगसिद्धिस्तत् प्रतिवक्तव्यम्—इति ।

वीर—अपि सुखेन पच्यते प्रयोजनसिद्धिः ?

मन्त्र—तथैव प्रयतिष्यते भगवती यथा स्वयमेव स्वां दुहितरमस्मत्स्वामिने प्रतिपादयिष्यति मथुरेश्वरः । तदहमप्यतर्कितोपनतेन प्रियासमागमोत्सवेन प्रतिपन्नराज्याभिषेकमस्मत्स्वामिनमाराधयामि । पश्य—

सङ्गतिश्चिरमचिन्तितपूर्वा
निर्वृतिप्रणयिनी मिथुनानाम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

आधिराज्यमधिरोहति तस्याः
षोडशीमपि कलां न मघोनः ॥ १७ ॥

(नेपथ्ये महान् कलकलः)

उभौ---अये! शब्द इव।

(पुनरपि नेपथ्ये)

भो भोः पाटलिपुत्रवासिनः पौराः, शृण्वन्तु भवन्तः—

श्रीमद्भिः सचिवसतैः समन्वितोऽसौ
लक्ष्मीवानुडुनिवहैरिवोडुराजः।
प्रह्वानां नयनमहोत्सवः प्रजानां
सम्प्राप्तो मगधकुलाङ्कुरः कुमारः ॥ १८ ॥

मन्त्र---(सहसोत्थाय)

जयति प्रथमं विजया जयन्ति देवाः स्वयं महादेवः।
श्रीमन्तौ भगवन्तावनन्तनारायणौ जयतः ॥ १९ ॥

कोऽत्र भोः। (प्रविशति चेटः)

चेटः---अंअ, अअं ह्मि संगदओ। (आर्य, अयमस्मि सङ्गतकः).

मन्त्र---सौम्य, त्वरिततरमितो गत्वा शूलपाणिसिद्धायतनसंज्ञापटहमाहत्याघोषय—सम्प्रति कृतराजकार्या वयम्। अतः परं महाहवेन भवितव्यम्। तदायुध-जीविनां कालः कर्मकराणाम्---इति।

चेट---जं अंओ आणवेदि। (निष्क्रान्तः) (यदार्य आज्ञापयति).

(उभौ परिक्रामतः)

वीर---अये! परिवृत्ता रजनी।

तरुणारुणरश्मिताडितं
निचितं पश्चिमसागरोपरि।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तिमिरं परिदृश्यते यथा
स्थितमौर्वानलधूममण्डलम् ॥ २० ॥

मन्त्र—अये! समुत्थितो दिवसः। पश्य—

दीर्घैर्दिगन्तविटपेषु करैरसंख्यै-
र्नक्षत्रपुष्पतरलेषु नभोद्रुमस्य।
स्नातोत्थितो जलनिधेरयमंशुमाली
सन्ध्यार्चनाय कुसुमापचयं करोति ॥ २१ ॥

(निष्क्रान्ताः सर्वे)

चतुर्थोऽङ्कः

—

पञ्चमोऽङ्कः।

—

(ततः प्रविशति लोकाक्षिः)

लोका—दिष्ट्येदानीं प्रतिलब्धराज्याभिषेको देवः कल्याणवर्मा! दिष्ट्या वत्सानुबन्धो निहतश्चण्डसेनहतकः! कुतः—

प्रकटितवर्णाश्रमपथमुन्मूलितचण्डसेनराजकुलम्।
कल्पन(?)मिव नमति जनः (सकलः) कल्याणवर्माणम् ॥ १ ॥

(परिक्रम्य) अहो तु खलु विटजनाभ्यर्चितकर्णीपुत्रकीर्तिस्तम्भालङ्कृतराजमार्गस्य कुसुमपुरवेशस्य परा श्रीः। इह हि—

वारस्त्रीव्यतिकरपेशलं समाजं
व्याकोशीकृतलटहं विटोत्तमानाम्।
गोष्ठीषु प्रमुदितवेषतो महोक्षा
हुङ्कारध्वनिमुखरान्विडम्बयन्ति ॥ २ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अये! अयं पुराणविटो वेशरक्षितः। शान्तनवमिव शरतल्पगतं वेशवाटमकरकेतुमन्दिरावसन्नमेनं पश्यामि। कुतः—

साकेतेऽकृतकौतुको विकलितः काञ्चीपुरे काञ्चिभिः
पम्पायामभिसारितः परिजनैर्विज्ञापितो वैदिशे।
गोत्रेषु स्खलितः कटाहनगरे यः कुण्डिने म(मु?)ण्डितो
वेशस्त्रीनिकषोपलश्चिरतरं भूत्वैव निष्ठां गतः॥ ३॥

(ततः प्रविशति वेशरक्षितः)

वेश—(निःश्वस्य) अहो! कृतान्तहतक, धिक् त्वामसदृशसंयोगकारिणम्। पश्य—

पौरस्त्यैर्यमिनां धातः पाश्चात्यैश्च विलासिनाम्।
व्यत्ययो न त्वया दृष्टो वयोभिरितरेतरम्॥ ४॥

लोका—(उपेत्य) भाव, किमेकाग्रेण चेतसा चिन्तयसि?

वेश—अये! लोकाक्षिरक्षदासः।

यत्प्राभृतं रहसि वेशविलासिनीनां
गोष्ठीषु यानि फणितानि सुहृज्जनानाम्।
सान्द्रे निशातमसि यानि च साहसानि
तान्येव यौवनसुखानि विचिन्तयामि॥ ५॥

लोका—पर्यन्तपरिहरणीयानाहुर्विषयान्, विशेषतस्तु वेशवासः। पश्य—

दातारं करणप्रयोगनिपुणं मन्दस्मिताभाषिणं
सम्पन्नं नवयौवनं प्रणयिनं रूपेण शीलाधिकम्।
बन्धक्या पुरुषप्रकाण्डमुचितं त्यक्त्वा परम्पाकृतः
कृच्छ्रग्रन्थिरवन्तिमाषविभवोऽप्युच्चालमुद्गीयते॥ ६॥

वेश—धिक्! भवन्तं श्रोत्रियमार्गानुसारिणम्। पर्यन्यपरितापनात्किल ते विरक्ता विषयेषु। तत्र पुनस्तत्रभवतां प्रज्ञापराधः। पश्य—

वेशे दत्तकसूत्रपाठनपरस्त्रीसूत्रमानास्पदे
स्वैरक्षैर्विनयानुकूलगतिभिर्नीत्वा वयो मध्यमम्।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

स्थाविर्ये तदनुस्मृतिप्रतिनिधिन्यायेन किं नेष्यते
तत्त्वं न प्रतिपद्यते किमु विटस्त्रैविद्यवृद्धो जनः ॥ ७ ॥

छिद्यतामियं कथा । सौम्य, चिराद्दृश्यसे । कुतः ? कथय ।

लोका—कुतश्चित् कारणादितः शूरसेनमथुरां गत्वा प्रतिनिवृत्तोऽस्मि ।

वेश—अस्त्यपूर्वा शौरसेनी कथा ?

लोका—अस्ति; यदुनाथः स्वां दुहितरं कीर्तिमतीमस्मत्स्वामिने देवाय कल्याणवर्मणे प्रतिपादयितुं व्यवसितः ।

वेश—द्वे अप्येते राजकुले परस्परेण समवायमर्हतः । कः पुनरिदानीमुपोद्घातः ?

लोका—भगवत्येव विन्ध्यवासिनी ।

वेश—कुलदैवतं हि यदूनामेकानङ्गा । ततस्ततः ।

लोका—अस्ति कीर्तिषेणराजकुले परमसम्मता योगसिद्धिर्नाम परिव्राजिका । सा कदाचिद्रहसि देव्या सह जामातृविशेषमन्तरेण चिन्तयन्तं राजानमेकेन चित्रपटेनोपस्थितवती । तत्र किल चित्रपटे कीर्तिमतीकल्याणवर्मणोः प्रतिकृतिद्वयमालिखितमासीत् । ततः किमेतदिति पृष्टा सती भगवती चित्रगतेयं मिथुनकल्पना प्रतिपत्तव्येत्येकानङ्गानुशासनमाख्यातवती ।

वेश—कथमेतत् ? कथं कथितो भवान्या ?

लोका—श्रूयताम्—सम्प्राप्तायां तस्यां किल रजन्यां—

भसितधवलमूर्तिराविरासीत्
कमलविलोचनविभ्रमा भवानी ।
कलमकणिशकान्तमुद्वहन्ती
शशिशकलाभरणं कपर्दभारम् ॥ ८ ॥

ततः सा—

शौनकमिव बन्धुमती कुमारमविमारकं कुरङ्गीव ।
अर्हति कीर्तिमतीयं कान्तं कल्याणवर्माणम् ॥ ९ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इत्येनामार्यां पठित्वा चित्रपटं दत्वा झटिति तिरोभूता। यः स चित्रपटः स्वहस्ते गृहीतः स परिव्राजिकायाः प्रतिबोधेऽपि हस्ते दृष्टः।

वेश—प्रसन्ना भगवती! बह्वाश्चर्याणि दैवतानि! ततस्ततः।

लोका—ततस्तस्यामवस्थायामस्मत्स्वामिपुरोहितसूनुरार्यरक्षितः कन्यावरणार्थं राजकुलं प्राप्तवान्। ततो मन्त्रिभिः सह सम्भूय दैवनिर्मितमेतादिति कृतबुद्धिरासीद्यदुनाथः।

वेश—अहो! सञ्चारिण्यभ्युदयपरम्परा देवस्य कल्याणवर्मणः।

नेपथ्ये)

भोः कुसुमपुरवासिनः पौराः, श्रृण्वन्तु श्रृण्वन्तु भवन्तो मन्त्रिमहत्तरस्य मन्त्रगुप्तस्य वचनम्—नित्योत्सवेऽपि कुसुमपुरे महोत्सवः समादिश्यते। कुतः—

प्रासादश्रृङ्गमधिरुह्य दिदृक्षतेऽसौ
हर्षोत्सवप्रमुदितं नगरं नरेन्द्रः।
उज्जृम्भमाणमुदधिं समुदीयमानः
पूर्वाचलेन्द्रशिखरादिव पूर्णचन्द्रः॥ १०॥

लोका—राज्यलाभसभाजनव्यपदेशेन शूरसेनसचिवेषु राजदुहितरमादाय प्राप्तेषु शङ्के समादिष्टोऽयमुत्सवः। तदहमपि महोत्सवं द्रक्ष्यामि।

वेश—साधयतु भवान्। (निष्क्रान्तौ)

विष्कम्भकः

(ततः प्रविशति परिव्राजिका)

परि—साधु भोः साहं मन्त्रगुप्तमार्गानुसारिणी प्रकृतिरिव पुरुषाधिष्ठिता कल्याणवर्माभ्युदयमेवं निरवर्तयम्। कुतः—

यदयं नृपसूनवे नृपः स्वयमेव स्वसुतां प्रयच्छति।
(विमृश्य)
अथ वैष भवेदनुग्रहो भगवत्या मम सा प्रसीदतु॥ ११॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कृतकृत्यस्य राज्ञो विप्रलम्भः कृत इति किंचिदिव मे हृदयस्यापरितोषः ।

अथवानुगुणेन तत्सुतां घटयन्त्या मगधेन्द्रसूनुना ।
यदुवंशविवृद्धये मया छलयन्त्यापि नृपो न वञ्चितः ॥ १२ ॥

निपुणिकया सह विविक्तरूपे प्रमदवने वत्सा कीर्तिमती । प्रथमं तावन्महाराजवचनात् सभाजनीयो मगधेश्वरः, पश्चात् कुमारी पुरोधसा । यावदहमपि मन्त्रगुप्तं पश्यामि । (निष्क्रान्ता)

(ततः प्रविशति राजा विदूषकश्च)

राजा—(निःश्वस्य)

प्राप्तं पाटलिपुत्रमेव नगरं नम्रा मुहुः पार्थिवाः
सेना सिन्धुविडम्बिनी परिणता सिद्धं च सिंहासनम् ।
श्लाघ्यं मध्यमलोकपालककुदच्छत्रं च मे धार्यते
तामप्राप्य नृपात्मजां परिकरः सर्वोऽयमाडम्बरः ॥ १३ ॥

विदू—भो वअस्स, मा संतप्पाहि ; अत्थि आसावसरो ; बहुएहिं उवाअणेहिं सूरसेणणाहपुरोहिदो भवंतं उवतिट्ठदि ।

भो वयस्य, मा सन्तप्य ; अस्त्याशावसरः ; बहुभिरुपायनैः शूरसेननाथपुरोहितो भवन्तमुपतिष्ठते)

राजा—इदं किलश्वासपदम् ! अस्मत्पितुः पुरा परं मित्रं शूरसेननाथः । स इदानीं प्रतिलब्धराज्यं मां निशम्य समाजयितुं पुरोधसं प्रेषितवानिति यावत् ।

(प्रविश्य दौवारिकः)

दौवा—जेदु महाराओ । एसो सूरसेणणाहपुरोहिदो पडिहारे चिट्ठदि ।
(जयतु महाराजः । शूरसेननाथपुरोहितः प्रतीहारे तिष्ठति)

राजा—अविलम्बितं प्रवेशयैनम् ।

दौवा—जं भट्टा आणवेदि । (यद्भर्ता आज्ञापयति) (निष्क्रान्तः).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(ततः प्रविशति पुरोहितो दौवारिकश्च)

पुरो—(स्वगतम्) राजानं सभाजयित्वा पश्चान्मन्त्रगुप्तेन योगसिद्ध्या च सह कुमारीमन्तरेण सर्वं समर्थयिष्यामि। साधु भोः—

प्राप्त इव साधुवादं समगुणघटनानिबन्धनं धाता।
तामपि तेन नृपसुतां स्रचमिव साम्ना समानयति ॥ १४ ॥

दौवा—इदो इदो अंओ (इत इत आर्य.) (उभौ परिक्रामतः)

विदू—अचाहिदं एदं तत्तहोदीए विरहविहुरं चित्तं; ण कज्जेण किंचि किलंमदि दे हिअअं। (अत्याहितमेतत् तत्रभवत्या विरहविधुरं चित्तम्। न कार्येण किञ्चित् क्लाम्यति ते हृदयम्)

राजा—अतिमुग्धमभिहितम्। पश्य—

गिरिमिव दुर्वहरूपं वियोगदुःखं वहामि कान्तायाः।
मम किल तस्यापि सखे कन्दुकलघु राज्यमतिभारम् ॥ १५ ॥

पुरो—(उपेत्य) वर्द्धतां देवः।

मौलीन्दुखण्डगलितैरमृतप्रवाहै-
रा रे वतीयकुसुमासवसेकसिक्तैः।
गौरीरतिश्रमविनोदविधानशेषैः
शम्भुश्चिरं तव करोतु महाभिषेकम् ॥ १६ ॥

राजा—आसनमत्रभवतः।

दौवा—एदं आसणं, उवविसदु अंओ। (एतदासनम्, उपविशत्वार्यः।)

पुरो—उपविशतु देवः। (उभावुपविशतः)

राजा—अपि कुशली शूरसेनेश्वरः?

पुरो—कुशली कीर्तिषेण इह भवन्तमनामयं पृच्छति। मय्यस्य सन्देशो वर्तते।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

राजा— यदाज्ञापयति प्रभुः ?

पुरो—त्वामाह कीर्तिषेणः---वत्स कल्याणवर्मन्,

राज्ञी सुपुत्रा मगधेन्द्रपत्नी
श्वःश्रेयसं तेऽस्तु चिराय जीव।
दिष्ट्या पुनः पुष्पपुरे सुगाङ्गं
प्रासादमध्यासितवान् कुमारः ॥ १७ ॥

पुनरप्याह--

अलङ्कर्तुमलं मन्ये द्वयोर्वक्षःस्थलद्वयम् ।
शार्ङ्गिणः कौस्तुभं रत्नं हारः कल्याणवर्मणः ॥ १८ ॥

इति हारमिमं प्रेषितवानिह भवते। (विदूषकस्य हस्ते हारमर्पयति)

विदू—(अपवार्य) एसो हारो, पेक्खदु पेक्खदु भवं। (—) (एष हारः, प्रेक्षतां भवान्).

राजा— (सकुतूहलं हारं पश्यति)

पुरो—देवस्य सकुतूहला दृष्टिः शूरसेनराजकुलसर्वस्वमिदं हाररत्नम्। अस्ति वा हारावतरणश्रवणे कुतूहलम् ?

राजा —कुतूहलिनो वयम्।

पुरो--श्रोतुमर्हति देवः। तदा खलु महाभारतसाम्पराये वर्तमाने--

सव्यं दक्षिणमस्यतः प्रशमितो यः सुप्रतीकः शरै-
श्चक्रव्यूहपृथक्प्रभेदघटनाशौण्डस्य गाण्डीविनः।
हारः कुम्भसमुद्भवैर्विरचितस्तारागणस्पर्द्धिभिः
प्रत्यादिष्टहराट्टहासशकलैस्तस्यैष मुक्ताफलैः ॥ १९ ॥

राजा--अहो! तु खलु वीरजनस्पृहणीयोऽयमपूर्वो रत्नहारः।

पुरो--ततः-- वार्ष्णेयीकुचतटकुङ्कुमाभिताम्रैः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्रत्यग्रक्षतिभिरिवोपलक्ष्यमाणैः।

संघृष्टः कपटकिरातशस्त्रमार्गै-
र्बीभत्सोरपि भुजमध्यमध्यवासीत् ॥ २० ॥

राजा—उत्पत्त्यनुरूपो विनियोगः। ततस्ततः।

पुरो—ततस्तथाभूतेषु वृष्णिषु सागरग्रस्तायां द्वारवत्यां प्रतिष्ठापितपरीक्षितः प्रव्रजितुकामस्य राजर्षेर्युधिष्ठिरस्यादेशाद्धनञ्जयेन शूरसेनेषु [पञ्चा] भिधानं वृष्णिकुमारं प्रतिष्ठापयता हारालङ्कारो दत्तः। तत्परम्परया कीर्तिषेणं प्राप्तः। भद्रं तव।

राजा—(पर्यश्रुनयनो हारं निरीक्षते)

पुरो—कथं हारदर्शनात् पर्यश्रुनयनो देवः संवृत्तः?

विदू—पुण्णसुलोआणं आअमीढाणं संकित्तणे कस्स ण होइ अस्सुणिवाओ? का कहा तेहिं धारिअअपुव्वाभरणदंसणेण?
(पुण्यश्लोकानामाजमीढानां सङ्कीर्तने कस्य न भवति अश्रुपातः? का कथा तैर्द्धारितापूर्वाभरणदर्शनेन?)

पुरो—भजमानमभिहितम्।

राजा—आचार्य, विश्राम्यताम्। नन्दक, मद्वचनादुच्यतां मन्त्रगुप्तः—विश्रान्तसुखिनमार्यं द्रष्टास्मि।

नन्द—जं महालाओ आणवेदि। (यन्महाराज आज्ञापयति)

पुरो—यदभिलषितं देवस्य। (नन्दकेन सह निष्क्रान्तः)

विदू—किंदाणीं मुग्धिअं? (किमिदानीं मोहितम्?)

राजा—(हारमुरसि निधाय) सखे, हारदर्शनात् पुनर्नवीभूतो मे मदनः। पश्य—

स कालः सकलो नूनं गतोऽपि पुनरागतः।
मया मायेव सम्प्राप्ता सा यदा यादवी सुता ॥ २१ ॥

क्व नु खलु पर्युत्सुकमात्मानं विनोदयामि?

विदू—भोअणसालं गच्छामो, आदु महाणसम्?
(भोजनशालां गच्छावः, उत महानसम्?)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

राजा--मुक्तः परिहासः ।

नाभीवापीप्रविष्टः स्तनशिखरगतो रोमरेखापदेन
प्रत्युत्पन्नप्रतापः स्फुरदधरमणिव्याजनीराजनेन ।
लब्धो लीलाकटाक्षैर्मनसिजकलभो वर्तते दुर्निवारो
देव्या लब्धप्रसादः कलमणिरशनाडिण्डिमारोहणेन ॥ २२ ॥

अपि च—

कान्तावियोगज्वलनाभितप्ते
चित्ते मदीये हरबद्धवैरः ।
दाहक्षमं कर्तुमिवात्मदेहं
दाहाभियोगं मदनो विधत्ते ॥ २३ ॥

विदू—होदु, पमदवणं एव्व पविसामो । (भवतु, प्रमदवनमेव प्रविशावः)

राजा—अग्रतो भव । (उभौ परिक्रामतः)

विदू-- पत्ता ह्म पमदवणं, विणोदेहि अत्ताणं ।
(प्राप्तौ स्वः प्रमदवनम् , विनोदयात्मानम्)

राजा—सखे, अतिक्रान्तचिकित्सः परोक्षो मदनातङ्कः । पश्य—

पार्श्वस्थेव पुरः स्थितेव दिवसे रात्रौ च सर्वात्मना
सङ्कल्पेन यथा पुरः प्रियतमा सैवेयमालक्ष्यते ।
रम्यद्वेषनिबन्धनो मनसि मे कष्टं वियोगोचितः
सन्तापोऽप्युपचीयते भगवतो धातुर्विचित्रा गतिः ॥ २४ ॥

विदू---एदं गिह्मकालसुभअपुल्लमल्लिआकुसुमट्टहासं लआघरं पविसामो । (एतद्-ग्रीष्मकालसुभगफुल्लमल्लिकाकुसुमाट्टहासं लतागृहं प्रविशावः)

राजा---तथास्तु । (उभौ प्रविशतः)

राजा—भोः कृतान्तहतक, धिक् त्वामसदृशसंयोगकारिणम् । कुतः—

या रात्रिर्विरहाभिषङ्गविषमा द्राघीयसी वर्तते
या ना सङ्गमहोत्सवप्रणयिनी क्षिप्रं क्षपा क्षीयते ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

व्यत्यासेन यदि त्वयेदमुभयं धातः कृतं तावता
लब्धाश्वासमुपप्लवेऽपि मिथुनं न त्वामुपक्रोशति ॥ २५ ॥

(चिन्तापरः शिलातले समुपविष्टः) (ततः प्रविशति कीर्तिमती निपुणिका च)

निपु—भट्टिदारिए, एसो भट्टा, पेक्खदु पेक्खदु भट्टिदारिआ ।
(भर्तृदारिके, एष भर्ता, प्रेक्षतां प्रेक्षतां भर्तृदारिका)

कीर्ति—अंअउत्तो ! (आर्यपुत्रः) !

निपु—(चित्रपटं दर्शयति)

कीर्ति—(निरीक्ष्य सासूयम्परावर्तते)

निपु—किं एदं ? (किमिदम् ?

कीर्ति—हला, दुज्जणो एसो जणो । एत्तिअं कालं विरहविहुरं इमं जणं विसुमरिअ अण्णाए सह रममाणो दीसइ
हला, दुर्जन एष जनः । एतावन्तं कालं विरहविधुरमिमं जनं विस्मृत्यान्यया सह रममाणो दृश्यते)

निपु—(अत्मगतम्) हुं ! सुमरणावट्ठिअहिअअदाए चित्तगदं भट्टारं परमत्थं जाणिअ अत्तपडिकिदिदंसणजाणिअअण्णवहूविंभमा भट्टिदारिआ । (प्रकाशम्) अत्तणो पडिकिदीए वंचिदासि । (—) (स्मरणावर्तितहृदयतया चित्रगतं भर्तारं परमार्थं ज्ञात्वा आत्मप्रतिकृतिदर्शनजनितान्यवधूविभ्रमा भर्तृदारिका । (—) आत्मनः प्रतिकृत्या वञ्चितासि)

कीर्ति—हद्धि ! अवरद्धा ह्मि । (सव्रीडा तिष्ठति)
(हा धिक् ! अपराद्धास्मि । (——)

निपु—पेक्खदु पेक्खदु भट्टिदारिआ भट्टारं । (प्रेक्षतां प्रेक्षतां भर्तृदारिका भर्तारम्)

कीर्ति—हला, कहिं उपविसिअ विस्सद्धा अंअउत्तसारिक्खदंसणेण दिट्ठिं तोसेमि ?
(हला, कुत्रोपविश्य विस्रब्धा आर्यपुत्रसादृश्यदर्शनेन दृष्टिं तोषयामि)

निपु—एदं अग्गदो लआघरं, तहिं पविसामो । (परिक्रामतः) (इदमग्रतो लतागृहम्, तत्र प्रविशावः) (—)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विदू—किं तत्तहोदा चिंतीअदि ? (किमत्रभवता चिन्त्यते ?)

निपु—भट्टिदारिए, लआघरब्भन्तरे अंअवैखाणसस्स विअ सरो सुणीअदि । लआविडपंतरेण पेक्खामो । (भर्तृदारिके, लतागृहाभ्यन्तरे आर्यवैखानसस्येव स्वरः श्रूयते । लताविटपान्तरेण प्रेक्षावहि)

कीर्ति- एव्वं होदु । (तथा कुरुतः) एवं भवतु (—)

निपु—अंहो भट्टा ! (अहो भर्ता !)

कीर्ति—ण हु अंअउत्तो, णाहं अस्स समीवे चिट्ठामि ।
(न खलु भर्ता, नाहमस्य समीपे तिष्ठामि) (परावर्तितुमारभते)

निपु—णं राअणेपच्छदंसणेण विप्पलद्धासि ।
(ननु राजनेपथ्यदर्शनेन विप्रलब्धासि)

कीर्ति—उंमत्तिए, कहं सो पुण्णमसीचंदं लज्जावअंतो महाराओ ?
(उन्मत्तिके, कथं स पौर्णमासीचन्द्रं लज्जापयन्महाराजः ?)

निपु—तु ह विरहोव्वग्गसरीरस्स भट्टिणो पच्चूषचंदसारिसी मुहसिरी तस्स ; पुण अस्सं समीवे अंअवैखाणसो मंतेदि । (तव विरहोद्विग्नशरीरस्य भर्तुः प्रत्यूषचन्द्रसदृशी मुखश्रीस्तस्य, पुनरस्य समीपे आर्यवैखानसो मन्त्रयते)

विदू—एक्को जंबुको विअ कोसुंतो सोहइ, ता पडिवअणं देहि ।
(एको जम्बुक इव क्रोशन् न शोभते, तत् प्रतिवचनं देहि)

राजा—सखे, वैखानस,

कीर्ति—हुं ! अंअउत्तो, हला, अग्गदो होहि ।
(हु ! आर्यपुत्रः, हला, अग्रतो भव)

निपु—भट्टिदारिए, कीस मए वारणं अंणेसअदि ? णं तुए एव्व सव्वंगीणो आमुत्तो रोमंचकंचुओ । (भर्तृदारिके, कीदृश्मया वारणमन्विष्यते ? ननु त्वयैव सर्वाङ्गीण आमुक्तो रोमाञ्चकञ्चुकः)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कीर्ति—हला किं मं लज्जावेसि ? (हला किं मां लज्जापयसि ?)

राजा——प्रियायाः प्रथमसमागममेव चिन्तयामि——

पातुं पद्मसुगन्धि लोलनयनं रोमाञ्चितं गण्डयो-
र्यावद्विद्रुमपाटलाधरपुटं वक्त्रं मयोन्नामितम् ।
वैलक्ष्यप्रतिषेधविक्लवगिरा तन्व्या तया मुग्धया
पश्चात्ताम्ररुचा करेण मम तु प्रच्छादिते लोचने ॥ २६ ॥

अपि च तदानीमेव कदाचित्——

दृष्ट्वासन्ने मयि तु सहसा स्वां वधूं वञ्चयित्वा
लौल्यात् पीत्वा कमलमधुपं कामपि प्रार्थयन्तम् ।
ध्यात्वा दूये सजलनयनं भङ्गुरभ्रूपताकं
प्रेमार्द्रं यत्प्रणयकुपितं कोपनायाः प्रियायाः ॥ २७ ॥

विदू——वअस्स, एक्कं राअकज्जं मंतेमि ।
(वयस्य, एकं राजकार्यं मन्त्रयामि)

राजा——छन्दतः ।

विदू——दाणिं पत्तरज्जाणं अह्लअपिच्छिअचिट्ठंताणं किं तेण अदिक्कंतेण इत्थिआवुत्तंतेण ? (इदानीं प्राप्तराज्यानां अशित्वा पीत्वा तिष्ठतां ? किं तेनातिक्रान्तेन स्त्रीवृत्तान्तेन ?)

राजा——धिग्वैधेयम् ।

निपु——अवेहि दुट्ठवडुअ, जदा तुवं राआ तदा एदं राअकज्जम् ।
(अपेहि दुष्टवटुक, यदा त्वं राजा तदेदं राजकार्यम्)

कीर्ति——(स्मितं करोति)

राजा——अयि प्रिये——

चेतस्त्वया सहितमेव तथापि नेदं
चक्षुः कृतार्थमिति केवलमातुरं मे ।
आवल्गिते वरतनु स्वजने जनानां
प्राप्ते मनोरथशतेऽपि कुतः प्रमोदः ॥ २८ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

निपु—भट्टिदारिए, अदिकरुणं भट्टा मन्तेदि ।
(भर्तृदारिके, अतिकरुणं भर्ता मन्त्रयते)

कीर्ति—णत्थि मे वअणावअरो । (नास्ति मे वचनावसरः)

निपु इमं दाव चित्तपडं भट्टिणो अग्गदो णिक्खिवामि । (तथा करोति)
(इमं तावच्चित्रपटं भर्तुरग्रतो निक्षिपामि) (--)

विदू---अविहा! अविहा! एसो पिण्डिअभोअमण्डलो वाअधिबहुकोढविसमो महाणाओ महाणाओ !

(अविहा! अविहा! एष पिण्डितभोगमण्डलो वालधिबहुक्रोडविषमो महानागो महानागः)

राजा---(निरूप्य) अयं स चित्रपटः; सखे, गृह्यताम् ।

विदू---ही! ही! ण खु अअं महाणाओ, चित्तपडो, गेह्णमि ।
(ही! ही! न खल्वयं महानागः, चित्रपटः, गृह्णामि)

राजा---कुतोऽस्य चित्रपटस्यावतारः? लतागृहान्निर्गत्य जानीमः ।

(उभौ निर्गमं नाटयतः)

निपु---जेदु भट्टा। (जयतु भर्ता)

कीर्ति---जेदु अंअउत्तो । (जयत्वार्यपुत्रः)

(उभौ प्रणमतः) (राजा कीर्तिमतीमुत्थाप्य परिष्वजते)

राजा---को नामावामभ्युदयविशेषः । अथ वा सखे वैखानस---

पश्यतोऽपि न विश्वासः सखेदस्य सखे मम ।
सङ्कल्पदृष्ट्या देव्या बहुशो वञ्चिता वयम् ॥ २९ ॥

विदू---किं एदं सच्चअं ण वेत्ति एसो सव्वंगीणो रोमंचो पुच्छिदव्वो ।
(किमेतत्सत्यं न वेति एष सर्वाङ्गीणो रोमाञ्चः प्रष्टव्यः)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

निपु—दिट्ठिआ पडिवण्णराअसद्दं भट्टिदारिआ भट्टारं पेक्खदि ।
(दिष्ट्या प्रतिपन्नराजशब्दं भर्तृदारिका भर्तारं प्रेक्षते).

राजा—(सहर्षम्) अयि निपुणिके—

प्रायशः पृथिवीशानां भोगैश्वर्यविडम्बना ।
कीर्तिमत्येव मे लक्ष्मीरिति गर्वस्मिता वयम् ॥ ३० ॥

(अपवार्य) सखे वैखानस, किमेतावच्चावदविदितमस्माभिः ।

विदू—एदं मंतगुत्तो जाणादि । (एतन्मन्त्रगुप्तो जानाति).

राजा—साधु मन्त्रगुप्त, साधु ; सम्यगाराधितोऽस्मि । सखे वैखानस ।

कविरिव वृषपर्वणो विभूतिं
बलमिव शूर्पकशासिनो वसन्तः ।
गरुरिव शतयज्वनः प्रबोधं
किमु न करोति चिरन्तनः सखा मे ॥ ३१ ॥

विदू—ही ही सामाअमाणदिअसपच्छिमजामो ओवट्टिअदिसामुहो मेहारोवो सगन्धवहो संतासइस्सिदि, ता पविसह्म अब्भंतरं । (ही ही श्यामायमानदिवसपश्चिमयामोऽवघट्टितदिशामुखो मेहारोपः सगन्धवहः सन्त्रासयिष्यति । तत्प्रविशामोऽभ्यन्तरम् ।

की—(मेघस्तनितं निशम्य) अंअउत्त, परित्ताआहि । (कम्पोत्तरं परिरभते) (—) (आर्यपुत्र परित्राहि (—)

राज—साधु भो· श्रमपरितोषिताः स्मः । प्रिये, दृश्यतां मधु (गज ?) घनसमयावतारः—

कक्षैषा करभोरु काञ्चनमयी मिथ्या तु विद्युल्लता
श्रीमच्छक्रशरासनच्छलवहः शृङ्गाररेखाविधिः ।
वर्षात्माकरशीकरव्यतिकरो गर्वोर्जितं गर्जितं
तैस्तैरम्बुदगोचरैः सुरगजो लिङ्गैः समुल्लिङ्गितः ॥ ३२ ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अपि च—

नृत्तारम्भप्रविततशिखश्श्रेष्टतां नीलकण्ठो
भृङ्गाघ्रातं सुरभिककुभः पुष्पमाविष्करोतु ।
प्रत्यावृत्ताः पुनरभिमताः साधु सीमन्तिनीनां
गण्डाभोगव्यतिकरवतीं वेणिमुद्वेष्टयन्तु ॥ ३२ ॥

(निष्क्रान्ताः सर्वे)

पञ्चमोऽङ्कः

कौमुदीमहोत्सवः समाप्तः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

Printed at the "BHASKARA" PRESS, TRIVANDRUM.

THE DAKSHINABHARATI SANSKRIT SERIES.

1. **Chaturbhani** consisting of four rare old amorous farces by **Sudraka, Vararuchi, Isvaradatta** and **Syamilaka.** These are the most unique productions in Sanskrit dramatic literature ... 2 0 0
2. **Kundamala** by **Dhiranaga** a drama of deep pathos ... 1 8 0
3. **Avantisundarikatha** by **Dandin** ... 1 12 0
4. **Kaumudimahotsava** a fine drama probably by **Vijjika.** 0 10 0
5. **Tapasavatsaraja** by **Anangaharsha (Mayuraja)** a drama much appreciated by great writers on Alankara. 1 8 0

WORKS UNDERTAKEN

6. **Vatsarajacharita** (Vīṇāvāsavadatta)—a drama by **Sudraka** ...
7. **Vitavrittam** by **Saumadatti** and **Dattakasutravritti**...
8. **Kautilya's Arthasastra** with two old commentaries by **Bhikshu** and **Sankara** ...
9. **Sringaraprakasa** by **Bhojadeva** (Chapters XI and XII on dramaturgy) ...
10. **Chitrasutra** (A rare work on painting) ...
11. **Kapphanabhyudaya**—A poem by **Sivasvamin** of Kashmir ...
12. **Sangitasudha** by **King Raghunatha** of Tanjore ...
13. **Sangitanarayana** by **King Narayanadeva** of **Parlakimidi** ...

Apply to :—

MANAGER,

DAKSHINABHARATI OFFICE,

366, Mint Street, MADRAS.

OR

S. K. RAMANATHA SASTRI,

MYLAPORE.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

TITLE PAGES PRINTED AT TIRUPATI SRI MAHANT'S PRESS, MADRAS.